मे प्रथमाः। तयः प्रत्ययः। द्वितयो। द्वितयाः। शेषं रामवत्। नेमे। नेमाः। शेषं सर्ववत्। ती
यस्य ङित्सु वा। द्वितीयस्मै। द्वितीयायै। इत्यादि। एवं तृतीयः। निर्जरः। जराया जरसन्य
तरस्यां। जराया जरस्वा जादौ विभक्तौ। पदांगाधिकारे तस्य च तदंतस्य च। निर्दिश्यमा
नस्यादेशा भवंति। एकदेशविकृतमनन्यवत्। इति जरश ट स्य जरस्। निर्जरसौ। नि
र्जरसः। इत्यादि। पक्षे हलादौ च रामवत्। उपजीव्यविरोधान्न जरस्। [illegible] विश्वपाः।
दीर्घाज्जसि च। दीर्घाज्जसि इचि न पूर्वसवर्णदीर्घः। विश्वपौ। सुडनपुंसकस्य। स्वादिपं
च वचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य। स्वादिष्व सर्वनामस्थाने। कप्रत्य
यावधिषु स्वादिषु असर्वनामस्थानेषु पूर्वं पदं स्यात्। यचि भं। यादिष्व जादिषु च कप्रत्य
यावधिषु स्वादिष्व सर्वनामस्थानेषु पूर्वं भं स्यात्। आकडारादेका संज्ञा। इत ऊर्ध्वं कडा
राः कर्मधारये इत्यतः प्राग् एकस्यैकैव संज्ञा ज्ञेया। या परानवकाशा च। आतो धातोः। आ

यद्यपि ओ ङि नौ चीत्येव सिद्धं जसि तु सत्यपि पूर्व
सवर्णदीर्घे [illegible] नौ नो सौ। तथापि गोयौ गोर्ये: इत्या
द्यर्थे सत्र मिदापि न्याय्य यत्ना दुपसं॥

दोषमात्रिस
ज्ञापतेसतांहि
घातकः निर्जरे:
४

नं० १२०५

कारांतो योधातुस्तदंतस्य भस्यांगस्य लोपः। अलोंत्यस्य। विश्वपः। विश्वपा। विश्वपाभ्यामि
त्यादि। एवं शंखध्मादयः। धातोः किं। हाहान्। आत इति योगविभागाद्धातोरपि क्वचित्।
न्कः। श्वः। हरिः। हरी। जसि च। ह्रस्वांतस्यांगस्य गुणः। हरयः। ह्रस्वस्य गुणः। संबुद्धौ। हे ह
रे। हरिं। हरी। हरीन्। शेषो घ्यसखि। शेष इति स्पष्टार्थं। ह्रस्वो याविदुतौ तदंतं सखि
वर्जं घिसंज्ञं। आङो नास्त्रियां। घेः परस्याङो ना स्यादस्त्रियां। आङिति टासंज्ञा। ह
रिणा। हरिभ्यां। हरिभिः। घेर्ङिति। घिसंज्ञस्य ङिति सुपि गुणः। हरये। हरिभ्यो। ह
रिभ्यः। गुणे कृते। ङसिङसोश्च। एङो ङसिङसोरति पूर्वमेकादेशः। हरेः। हरिभ्यां।
हरिभ्यः। हरेः। हर्योः। हरीणां। अच्च घेः। इदुद्भ्यामुत्तरस्य ङेरौत् घेरत्। हरौ। हर्योः। ह
रिषु। एवं कव्यादयः। अनङ् सौ। सख्युरंगस्यानङादेशोऽसंबुद्धौ सौ। अलोंत्यात्पूर्वमुप
धा। सर्वनामस्थाने चासंबुद्धौ। नांतस्योपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने। अप्र

येण वस्त्रं काषायं । मांजिष्ठं । रागात्किं । देवदत्तेन रक्तं वस्त्रं । लाक्षारोचनाट्ठक् । लाक्षिकः । रोचनि-
कः । शकलकर्दमाभ्यामुपसंख्यानं । शाकलिकः । कार्दमिकः । नील्या अन् । नील्या रक्तं नील्यात्र नू ॥
नील्या रक्तं नीलं । पीतात्कन् । पीतकं । हरिद्रामहारजनाभ्यामञ् । हारिद्रं । माहारजनं । नक्षत्रे-
त्रेण युक्तः कालः । तिष्यपुष्ययोर्नक्षत्राणि यलोपः । पुष्येण युक्तं पौषमहः । लुब्विशेषे । पूर्वेण वि-
हितस्य लुप् षष्टिदंडात्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते । अद्य पुष्यः । दृष्टं सामोतेनस्ये-
व । वसिष्ठेन दृष्टं वासिष्ठं साम । वामदेवाड्ड्यड्ड्यौ । वामदेवेन दृष्टं वामदेव्यं । परिवृतो रथः ।
वस्त्रेण परिवृतो वास्त्रो रथः । तत्रोद्धृतममत्रेभ्यः । शरावे उद्धृतः शारावः ओदनः । संस्कृतं भक्षाः ।
सप्तम्यन्तात् संस्कृतेऽर्थे यत्संस्कृतं भक्षाश्चेत्ते स्युः । भ्राष्ट्रेषु संस्कृता भ्राष्ट्रा भक्षाः । शूलोखा-
द्यत् । अणोऽपवादः । शूलेन संस्कृतं शूल्यं मांसं । उख्यं । दध्नष्ठक् । दध्नि संस्कृतं दाधिकं ॥
सास्मिन्पौर्णमासीति । इति शब्दात्संज्ञायामिति लभ्यते । पौषी पौर्णमासी अस्मिन् पौषो मासः ॥

सकौ॰ ५०

50

सास्यदेवता। इंद्रोदेवतास्यऐंद्रंहविः। पाशुपतं। बार्हस्पत्यं। त्यज्यमानद्रव्येउद्देश्यविशेषोदे
वतामंत्रस्तुत्याच। ऐंद्रोमंत्रः। कस्येत्। कशब्दस्येकारः प्रत्ययसन्नियोगेन। यस्येतिलोपात्पर
त्वादादिवृद्धिः। कोब्रह्मादेवतास्यकायंहविः। श्रीर्देवतास्यश्रायं। शुक्राद्घन्। शुक्रियं। सोमा
ट्ट्यण्। सौम्यं। वाय्वृतुपित्रुषसोयत्। वायव्यं। रीङ्ऋतः अकृद्यकारेऽसार्वधातुकेयकारे
च्वौचपरे ऋदंतांगस्यरीङादेशः। यस्येतिच। पित्र्यं। उषस्यं। द्यावापृथिवीशुनासीरमरुत्व
दग्नीषोमवास्तोष्पतिगृहमेधाच्छच। चाद्यत्। द्यावापृथिवीयं। द्यावापृथिव्यं। शुनासीरीयं।
शुनासीर्यं। महाराजप्रोष्ठपदाट्ठञ्। माहाराजिकं। प्रौष्ठपदिकं। देवताद्वंद्वेच। अत्रपूर्वोत्तरपद
योरादिवृद्धिर्ञितिणितिकितिच। आग्निमारुतं। नेंद्रस्यपरस्य। सेमैंद्रः। परस्यकिं। ऐंद्रा
ग्नः। दीर्घाच्चवरुणस्य। नवृद्धिः। ऐंद्रावरुणं। दीर्घात्किं। आग्निवारुणी। मनड्वाही। पितृव्यमा
तुलमातामहपितामहाः। एतेनिपात्यंते। पितुर्भ्रातापितृव्यः। मातुर्भ्रातामातुलः। मातुःपितामा

राम ५०

तामहः। पितुः पिता पितामहः तस्य समूहः। काकानां समूहः काकं। भिक्षादिभ्योऽण्। भैक्षं। गर्भि
णीनां समूहो गार्भिणं। इह भस्याढे इति पुंवद्भावे कृते। इनण्यनपत्ये। अनपत्यार्थेऽणि इन् प्रकृत्या
। तेन नस्तद्धिते इति टिलोपो न। युवतीनां समूहः यौवनं। शात्रंतादनुदात्तादेरस्त्रियोवतं। गोत्रो
क्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्। ग्लुचुकायनीनां समूहो ग्लौचुकायनकं॥
औक्षकमित्यादि। आपत्यस्य चेति यलोपे प्राप्ते। प्रकृत्याके राजन्यमनुष्ययुवानः। राजन्यकं। मा
नुष्यकं वृद्धाच्चेति वक्तव्यं। वार्द्धकं। केदाराद्यञ् च। चाद्वुञ्। कैदार्यं। कैदारकं। गणिकाया य
ञ्वक्तव्यः। गाणिक्यं। ठञ् कवचिनश्च। चात्केदारादपि। कवचिनां समूहः कावचिकं। कैदारिकं।
ग्रामजनबंधुभ्यस्तल्। ग्रामता। जनता। बंधुता। तलंतं स्त्रियां। गजसहायाभ्यां चेति वक्तव्यं। ग
जता। सहायता। अह्नः खः क्रतौ। अहीनः। अचित्तहस्तिधेनोष्ठक्। इसुसुक्तांतात्कः। इसउसू उ
कृतष्टत्वं दंतात्परस्य ठस्य कः। साक्तुकं। हास्तिकं। धैनुकं। केशाश्वाभ्यां यञ्छावन्यतरस्यां। पक्षे
ठगणौ। कैश्यं। कैशिकं। अश्वीयं। आश्वं। पाशादिभ्यो यः। पाश्या। तृण्या। धूम्यावन्या वात्या। खल

मको॰उ॰
५१
51

गोरथवातात् । खल्या । गव्या । रथ्या ॥ इनित्रकट्यचश्च । खलादिभ्यः क्रमात्स्युः । खलिनी । गोत्रा । र
थकट्या ॥ खलादिभ्य इनिर्वक्तव्यः । डाकिनी कुटुंबिनी । आकृतिगणोयं । तदस्यां प्रहरणमिति क्री
डायां णः । दंडः प्रहरणमस्यां क्रीडायां दांडा । मौष्टा । घञः सास्यां क्रियेति ञः । घञंतात्क्रिया
वाचिनः प्रथमांतादस्यामित्यर्थे स्त्रीलिंगे ञप्रत्ययः । श्येनतिलस्य पाते ञे । अनयोर्मुम् ञप्रत्य
ये परे पातशब्दे उत्तरपदे । श्यैनंपाता मृगया । तैलंपाता स्वधा । श्येनतिलस्य किं । दंडपातोस्यां दां
डपाता तिथिः । तदधीते तद्वेद । न य्वाभ्यां पदांताभ्यां पूर्वौ तु ताभ्यामैच् । पदांताभ्यां यकारवकारा
भ्यां परस्य न वृद्धिः किंतु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः । व्याकरणमधीते वेत्ति वा वैयाकरणः ।
क्रमादिभ्यो वुन् । क्रमकः । पदकः । शिक्षकः । मीमांसकः । क्रतूक्थादिसूत्रांताट्ठक् । क्रतुविशेषवाचि
नामेवेह ग्रहणं । तेभ्यो मुख्यार्थेभ्यो वेदितरि तत्प्रतिपादकग्रंथपरेभ्यस्त्वध्येतरि । आग्निष्टोमि
कः । वाजपेयिकः । उक्थं सामविशेषः । तल्लक्षणपरो ग्रंथविशेषो लक्षणयोक्थं । तदधीते वेद वा
औक्थिकः । मुख्यार्थात्तु न्यक्शब्दाद् गणे निष्पते । नैयायिकः । वार्तिकः । लौकायतिकः । सूत्रां

राम
५१

तानुअकल्पादेरेवेष्यते।सांग्रहसूत्रिकः।अकल्पादेः किं।काल्पसूत्रः।विद्यालक्षणकल्पांता

च्चेति वक्तव्यं।वायसविद्यिकः।गौलक्षणिकः।पाराशरकल्पिकः।अंगक्षत्रधर्मत्रिपूर्वाद्विद्यांता

न्नेति वक्तव्यं।आंगविद्यः।क्षात्रविद्यः।धार्मविद्यः।त्रिविधाविद्या त्रिविद्या।तामधीते वेत्ति वा त्रै

विद्यः।तदस्मिन्नस्तीति देशे तन्नाम्नि।उदुंबराः संत्यस्मिन्देशे औदुंबरो देशः।तेन निर्वृत्तं।कुशांबे

न निर्वृत्ता कौशांबी नगरी।तस्य निवासः।शिबीनां निवासो देशः शैबः।अदूरभवश्च।विदिशा

या अदूरभवं वैदिशं।वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यककठकोऽरीहण

कृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकु

मुदादिभ्यः।सप्तदशभ्यः सप्तदश क्रमात्स्युश्चतुरर्थ्यां।अरीहणादिभ्यो वुञ्।आरीहणेन नि

र्वृत्तं आरीहणकं।कृशाश्वादिभ्यश्छण्।कार्शाश्वीयः।ऋश्यादिभ्यः कः।ऋश्यकं।कुमुदा

दिभ्यष्ठच्।कुमुदिकं।काशादिभ्य इलः।काशिलः।तृणादिभ्यः सः।तृणसं।प्रेक्षादिभ्य इनिः।

प्रेक्षी। अश्मादिभ्यो रः। अश्मरः। सख्यादिभ्यो — — । साखेयं। संकाशादिभ्यो ण्यः। सांकाश्यं। ब
लादिभ्यो यः। बल्यं। पक्षादिभ्यः फक्। पाक्षायणः। पथः पंथ च। पांथायनः। कर्णादिभ्यः फिञ्॥
कार्णायनिः। सुतंगमादिभ्य इञ्। सौतंगमिः। प्रगदिभ्यो ञ्यः। प्रागदिन्। प्रागद्यः। वराहादिभ्यः कक्।
वाराहकः। कुमुदादिभ्य ठक्। कौमुदिकः। जनपदे लुप्। जनपदे वाच्ये चातुरर्थिकस्य लुप्। लुपि
युक्तवद्व्यक्तिवचने। लुपि सति प्रकृतिवल्लिंगवचने स्तः। पंचालानां निवासो जनपदः पंचालाः। कुर
वः। अंगाः। वंगाः। कलिंगाः। वरणादिभ्यश्च। अजनपदार्थ आरंभः। वरणानामदूरं भवं नगरं वरणाः।
शार्कराया वा। अस्माच्चातुरर्थिकस्य लुप् वा। ठक्छौ च। शार्कराया एतौ स्तः। कुमुदादौ वराहादौ
च पाठसामर्थ्यात् पक्षे ठच्ककौ। वाग्रहणसामर्थ्यात् पक्षे औत्सर्गिकोऽण्। तस्य लुग्विक
ल्पः। षड् रूपाणि। शार्करा। शार्करं। शार्करिकं। शार्करीयं। शार्करीकं। शार्करकं। नद्यां मतुप्॥
चातुरर्थिकः। इक्षुमती। कुमुदनडवेतसेभ्यो ड्मतुप्। झयः। मतोर्मस्य वः॥ कुमुद्वान्। नड्वान्॥

मादुपधायाश्च मतोर्वोऽयवादिभ्यः। मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य म
तोर्मस्य वः। वेतस्वान्। नडशादाड्ड्वलच्। नड्वलः। शाद्वलः। शिखाया वलच्। शिखावलं नगरं।
उत्करादिभ्यश्छः। उत्करीयं। नडादीनां कुक् च। नडकीयं। क्रुंचा ह्रस्वत्वं च। क्रुंचकीयं। तक्षन्नलो
पश्च। तक्षकीयः॥ ॥इति चातुरर्थिकाः॥ ॥शेषे। अपत्यादिचतुरर्थ्यंतादन्यो
र्थः। शेषस्तत्राणादयः स्युः। चक्षुषा गृह्यते चाक्षुषं रूपं। श्रावणः शब्दः। औपनिषदः पुरुषः। दृ
षदि पिष्टा दार्षदाः सक्तवः। उलूखले क्षुण्णो औलूखलो यावकः। अश्वैरुह्यते आश्वो रथः॥
चतुर्भिरुह्यते चातुरं शकटं। चतुर्दश्यां दृश्यते चातुर्दशं रक्षः। तस्य विकारः इत्यतः प्राक् शेषा
धिकारः। राष्ट्रावारपाराद्घखौ। आभ्यां घखौ स्तः। राष्ट्रे जातादि राष्ट्रियः। अवारपारीणः। अवा
रपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यं। अवारीणः। पारीणः। पारावारीणः। इह प्रकृति
विशेषाद्घादयष्ट्युट्युलंता उच्यंते तेषां जातादयोर्थविशेषाः समर्थविभक्तयश्च वक्ष्यंते। ग्रा

माघरवश्रौ।ग्राम्यः।ग्रामीणः।नद्यादिभ्यो ढक्।नादेयं।माहेयं।वाराणसेयं।दक्षिणापश्चा
त्पुरसस्त्यक्।दाक्षिणात्यः।पाश्चात्यः।पौरस्त्यः।द्युप्रागपागुदक्प्रतीचो यत्।दिव्यं।प्राच्यं।उदी
च्यं।प्रतीच्यं।अव्ययात्त्यप्।अमेहक्वतसित्रेभ्य एव।अमात्यः।इहत्यः।क्वत्यः।ततस्त्यः।तत्र
त्यः।त्यब्नेर्ध्रुवे।नित्यः।निसो गते।— स्वातादौ तद्धिते।ह्रस्वादिणः सस्य षस्तादौ तद्धिते।निर्ग
तो वर्णाश्रमेभ्यो निष्ट्यश्चंडालादिः।अरण्याण्णः।आरण्याः सुमनसः।दूरादेत्यः।दूरेत्यः।उत्त
रादाहञ्।औत्तराहः।ऐषमोह्यःश्वसोऽन्यतरस्यां।एभ्यस्त्यब्वा।पक्षे वक्ष्यमाणौ ट्यट्युलौ।ऐषम
स्त्यं।ऐषमस्तनं।ह्यस्त्यं।ह्यस्तं।ह्यस्तनं।श्वस्त्यं।श्वस्तनं।पक्षे शौवस्तिकं वक्ष्यते।वृद्धाच्छः।शाली
यः।त्यदादीनि च।वृद्धसंज्ञानि स्युः।तदीयः।वा नामधेयस्य वृद्धसंज्ञा।देवदत्तीयः।देवदत्तः।
भवतष्ठक्छसौ।वृद्धाद्भवत एतौ स्तः।भावत्कः।सिति च।तद्धिते पूर्वपदं।अस्त्वं।भवदीयः।वृद्धा
दित्यनुवृत्तेः शत्रंतादेणवाभावतः।काश्यादिभ्यष्ठञ्ञिठौ।इकार उच्चारणार्थः।काशिकी।काशि

का। वैदिकी वैदिका। आपदादिपूर्वपदात्कालांतात्॥ आपदादिराकृतिगणः। आपत्कालिकी॥
आपत्कालिका। धन्वयोपधाद्वुञ्॥ धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वुञ्॥
ऐरावतं धन्व ऐरावतकः। सांकाश्यकांपिल्यशब्दौ वुञ्छणादिसूत्रेण ण्यांतौ। सांकाश्यकः।
कांपिल्यकः। नगरात्कुत्सनप्रावीण्ययोः। कुत्सिते प्रवीणे च जातादौ प्रत्ययार्थे नगरशब्दाद्वुञ्॥
नागरकश्चौरः शिल्पी वा। एतयोः किं। नागरा ब्राह्मणाः। अरण्यान्मनुष्ये वुञ्॥ औपसंख्या
निकणस्यापवादः। पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यं॥ आरण्यकः पंथाः अध्या
यो न्यायो विहारो हस्ती वा। गर्त्तोत्तरपदाच्छः। देश इत्येव। वृकगर्त्तीयं। गहादिभ्यश्च। गहीयः।
युष्मदस्मदोरन्यतरस्यां खञ्च। चात् छः। पक्षेऽण्। युवयोर्युष्माकं वायं युष्मदीयः। अस्मदीयः।
तस्मिन्नणि च युष्माकास्माकौ। युष्मदस्मदोरेतावादेशौ स्तः खञ्यपि च। यौष्माकीणः। आस्माकीनः। यौ
ष्माकः। आस्माकः। तवकममकावेकवचने। एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः॥

म.कौ.उ. खञ्यणि च। तावकीनः। तावकः। मामकीनः। मामकः। छे तु। प्रत्ययोत्तरपदयोश्च। मपर्यंतयोरन
५८ योरेकार्थवाचिनोस्त्वमौ स्तः प्रत्यये उत्तरपदे च। त्वदीयः। मदीयः। त्वत्पुत्रः। मत्पुत्रः। मध्यान्मः। म
54 ध्यमः। अ सांप्रतिके। मध्यशब्दादकारप्रत्ययः सांप्रतिकेर्थे। उत्कर्षापकर्षहीनो मध्यो वैयाकर
णः। मध्यं दारु। नातिह्रस्वं नातिदीर्घमित्यर्थः। द्वीपादनुसमुद्रं यञ्। समुद्रसमीपे यो द्वीपस्त
द्विषयाद्द्वीपशब्दाद्यञ्। द्वैप्यं। द्वैप्या। कालाट्ठञ्। मासिकं सांवत्सरिकं। अव्ययानां भमात्रे
टिलोपः। सायंप्रातिकः पौनःपुनिकः। कथं तर्हि शार्वरस्य तमसो निषिद्धये इति कालिदासः।
अनुदितौषसरागेति भारविः। समानकालीनं प्राक्कालीनमित्यादि च। अपभ्रंशा एवैत इति प्रा
माणिकाः। तत्र जात इति यावत्कालाधिकारः। श्राद्धे शरदः। ठञ् ऋत्वणोऽपवादः। शारदिकं श्रा
द्धं। विभाषा रोगातपयोः। शारदिकः शारदो वा रोगः आतपो वा। निशाप्रदोषाभ्यां च। ठञ्। नैशिकं।
नैशं। प्रादोषिकं। प्रादोषं। श्वसस्तुट् च। श्वस ठञ् स्यात्तस्य तुट् च। द्वारादीनां च। एषां न वृद्धिरैजाग
मश्च। शौवस्तिकं। संधिवेलाद्यृतुनक्षत्रेभ्योऽण्। संधिवेलायां भवं सांधिवेलं। ग्रैष्मं। तैषं। संधि राम
५८

वेला संध्या। अमावास्या। त्रयोदशी। चतुर्दशी। पंचदशी। प्रतिपत्। प्रावृष एण्यः। प्रावृषेण्यः।
वर्षाभ्यष्ठक्। वर्षासु साधु वार्षिकं वासः। सर्वत्राण् च तलोपश्च। हेमंताद् अण् तलोपश्च। चकारात्प
क्षे ऋत्वण्। हेमंतं। सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च। सायमित्यादिभ्यश्चतुर्भ्यो अव्य
येभ्यश्च कालवाचिभ्यः ट्युट्युलौ स्तस्तयोस्तुट् च। सायंतनं। चिरंतनं। प्राह्णप्रगयोरेदंतत्वं नि
पात्यते। प्राह्णेतनं। प्रगेतनं। दोषातनं। दिवातनं। चिरपरुत्परारिभ्यस्त्नो वक्तव्यः। चिरत्नं।
परुत्नं। परारित्नं। अग्रादिपश्चाड्डिमच्। अग्रिमं। आदिमं। पश्चिमं। अंताच्च। अंतिमं। विभा
षा पूर्वाह्णापराह्णाभ्यां। आभ्यां ट्युट्युलौ वा स्तस्तयोस्तुट् च। पक्षे ठञ्। पूर्वाह्णेतनं। अपराह्णेतनं।
तत्र जातः। सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः। स्रुघ्ने जातः स्रौघ्नः। औत्सः।
राष्ट्रियः। अवारपारीणः इत्यादि। प्रावृषष्ठप्। एण्यस्यापवादः। प्रावृषिकः। प्रायभवः। तत्रे
त्येव। स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः। संभूते। स्रुघ्ने संभवति स्रौघ्नः। कोशाड्ढञ्। कौशे
यं वस्त्रं। तत्र भवः। स्रुघ्ने भवः स्रौघ्नः। औत्सः। राष्ट्रियः। दिगादिभ्यो यत्। दिश्यं। वर्ग्यं। शरीराव

मकौ·उ·
५५
55

यवाद्यत्। दंत्यं। कंठ्यं। दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। दार्तेयं। कलशिर्घटः। तत्र भवं कालशे-
यं। ग्रीवाभ्योऽण् च। चाड्ढञ्। ग्रैवेयं ग्रैवं। गंभीराञ्ञ्यः। गंभीरे भवं गांभीर्यं। अव्ययीभावाच्च।
परिमुखं भवं पारिमुख्यं। परिमुखादिभ्य एवेष्यते। नेह। औपकूलं। अन्तःपूर्वपदाट्ठञ्। अव्य-
यीभावादित्येव। वेश्मनि अन्तर्वेश्मं। तत्र भवं आंतर्वेश्मिकं। आंतर्गणिकं। अध्यात्मादेष्ठञिष्य-
ते। अध्यात्मे भवं आध्यात्मिकं। अनुशतिकादीनां च। एषामुभयपदवृद्धिर्ञिति णिति किति च।
आधिदैविकं। आधिभौतिकं। ऐहलौकिकं। आकृतिगणोऽयं। जिह्वामूलांगुलेश्छः। जिह्वामूली-
यं। अंगुलीयं। वर्गान्ताच्च। कवर्गीयं। ततआगतः। स्रुघ्नादागतः स्रौघ्नः। ठगायस्थानेभ्यः। शुल्कशा-
लाया आगतः शौल्कशालिकः। विद्यायोनिसंबंधेभ्यो वुञ्। औपाध्यायकः। पैतामहकः। ऋतष्ठञ्।
वुञोऽपवादः। हौतृकं मातृकं। भ्रातृकं। पितुर्यच्च। चाड्ढञ्। रीङ् ऋतः। यस्येति लोपः। पित्र्यं। पैतृ-
कं। गोत्रादंकवत्। बिदेभ्य आगतं बैदं। गार्गं दाक्षं। औपगवं। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः।
समादागतं समरूप्यं। पक्षे गहादित्वाच्छः समीयः। देवदत्तीयं। देवदत्तरूप्यं। मयट्च। सममयं। राम ५५

दैवदत्तमयं । प्रभवति ।। हिमवतः प्रभवति हैमवती गंगा ।। विदूराञ्ञ्यः । विदूरात्प्रभवति वैदूर्यो मणिः ।
दंयमध्यायं शाद्वलवत् । नलुनडूलवन्मूर्द्धन्यमध्यः । नन्वयो संगतिः । वालवायादिश्वसौ प्रभव
ति विदूरे तु संस्क्रियते इति विस्तरः । अत एव समाहितं भाष्ये । वालवायो विदूरं चेति । वालवायशब्दः
प्रत्ययेन भवति विदूरादेशो वा । सूत्रे पठितेनानुरूपः स्थानी आक्षिप्यते । तद्गच्छति पथिदूतयोः । स्रुघ्नं
गच्छति स्रौघ्नः पंथाः दूतो वा । अभिनिष्क्रामति द्वारं । स्रुघ्नमभिगच्छति स्रौघ्नं कान्यकुब्जद्वारं । अ
धिकृत्य कृते ग्रंथे । शारीरकमधिकृत्य कृतो ग्रंथः शारीरकीयः । शारीरकं भाष्यमिति तु अभेदोप
चारात् । सोऽस्य निवासः । स्रुघ्नः निवासोऽस्य स्रौघ्नः । तेन प्रोक्तं । पाणिनिना प्रोक्तं पाणिनीयं । पारा
शर्यशिलालिभ्यां भिक्षुनटसूत्रयोः णिनिः स्यात् । पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पारा
शरिणः भिक्षवः । शैलालिनो नटाः । कर्मंदकृशाश्वादिनिः । कर्मंदेन प्रोक्तं भिक्षुसूत्रमधीयते
[illegible]
कर्मंदिनो भिक्षवः कृशाश्विनो नटाः । उपज्ञाते । पाणिनिना उपज्ञातं पाणिनीयं । तस्येदं । उपगोरि
दमौपगवं । समिधामाधाने षेण्यण् । सामिधेन्यो मंत्रः । ऋच्यायन । ऋच्यं चक्रं । पत्त्रपूर्वादञ् । अश्व

म.कौ.उ.
५६
56

रथस्येदं आश्वरथं। हलसीराट्ठक्। हालिकं। सैरिकं। गोत्रचरणाद्वुञ्। औपगवकं। चरणाद्ध
र्माम्नाययोरिति वक्तव्यं। काठकं। संघाङ्कलक्षणेष्वञ्यञिञामण्। घोषग्रहणमपि कर्तव्यं। अ
ञ्विञ्लसंघोङ्को घोषो वा। बैदं लक्षणं। यञः। गार्गः। गार्गी इञः। दाक्षः। दाक्षं। परं परा संबंधो
कः। साक्षान्नलक्षणं॥ ॥इति शैषिकाः॥ ॥तस्य विकारः। अश्मनो विकारः। अ
श्मनो विकारे टिलोपः। अश्मनो विकार आश्मः। भस्मनः मार्तिकः। अवयवे च प्राण्योषधिवृक्षे
भ्यः। चादिकारे। मयूरस्य विकारोऽवयवो वा मायूरः। मौर्वं काण्डं भस्म वा। पैप्पलं। त्रपुजतुनोः
षुक्। आभ्यामण् एतयोः षुक् च। त्रापुषं जातुषं। ओरञ्। दैवदारवं। अनुदात्तादेश्च। अञ्। का
पित्थं। पलाशादिभ्यो वा। अञ्। पालाशं। खादिरं। शम्या ट्लञ्। शामीलं। मयड्वैतयोर्भाषायाम
भक्ष्याच्छादनयोः। प्रकृतिमात्रान्मयड्वा विकारावयवयोः। अश्ममयं। आश्मनं। अभक्ष्येत्या
दि किं। मौद्गः सूपः। कार्पासमाच्छादनं। नित्यं वृद्धशरादिभ्यः। आम्रमयं। शरमयं। एकाचो नित्यं। राम ५६

वा स्नयं। गोश्च पुरीषे। गोमयं। एण्या ढञ्। एणेयं। एणस्य तु ऐणं। गोपयसोर्यत्। गव्यं। प
यस्यं। फले लुक्। विकारावयवप्रत्ययस्य। लुक् तद्धितलुकि। उपसर्जनस्त्रीप्रत्ययस्य। आ
मलक्याः फलं आमलकं। प्लक्षादिभ्योऽण्। विधिसामर्थ्यान्न लुक्। प्लाक्षं। न्यग्रोधस्य च केवल
स्य। अस्य न वृद्धिः ऐजागमश्च। नैयग्रोधं। जंब्वा वा। अण् फले। जांबवं। पक्षे ओरञ् तस्य लु
क्। जंबु। लुप् च। वा जंब्वाः फलप्रत्ययस्य लुप्। युक्तवत्। जंबूः। फलपाकशुषामुपसंख्यानं॥
व्रीहयः। मुद्गाः। पुष्पमूलेषु बहुलं। मल्लिकायाः पुष्पं मल्लिका। जाती। विदार्याः मूलं विदारी।
बहुलग्रहणान्नेह। पाटलानि पुष्पाणि। साल्वानि मूलानि। बाहुलकात् क्वचिल्लुक्। अणोर्कः। क
रवीरं। हरीतक्यादिभ्यश्च। फलप्रत्ययस्य लुप्। हरीतक्यादीनां लिंगमेव प्रकृतिवत्। ह
रीतक्याः फलानि हरीतक्यः॥ ॥ इति प्राग्दीव्यतीयाः॥ ॥ प्राग्वहतेष्ठक्। त
द्वहतीत्यतः प्राक् ठगधिक्रियते। तदाहेति माशब्दादिभ्य उपसंख्यानं। माशब्द इत्याह माशब्दिकः।
आहौ प्रभूतादिभ्यः। प्रभूतमाह प्राभूतिकः। पार्याप्तिकः। पृच्छतौ सुस्ना

मको॰उ॰ ५७ 57

तादिभ्यः। सुस्नातं पृच्छति सौस्नातिकः। अनुशतिकादिः। गच्छतौ परदारादिभ्यः। पारदारिकः॥
गौरतल्पिकः। तेन दीव्यति खनति जयति जितं। अक्षैर्दीव्यति खनति जयति जितं वा आक्षिकः॥
संस्कृतं। दध्ना संस्कृतं दाधिकं। माविकं। तरति। उडुपेन तरति औडुपिकः। गोपुच्छाट्ठञ्। गोपुच्छि
कः। नौद्व्यचष्ठन्। नाविकः। घटिकः। चरति। हस्तिना चरति हास्तिकः। दध्ना चरति दाधिकः। पर्या
दिभ्यष्ठन्। पर्येण चरति पर्पिकः। येन पीठेन पंगवश्चरंति स पर्पः। अश्विकः। रथिकः। श्वगणाट्ठञ्।
वात् ष्ठन्। श्वगणेन चरति श्वागणिकः। श्वगणिकः। वेतनादिभ्यो जीवति। वैतनिकः। विभाषाविधि
वधात्ष्ठन्। पक्षे ठक्। विवधेन हरति विवधिकः। वैवधिकः। एकदेशविकृतत्वाद्वीवधादपि वीव
धिकः। वैवधिकः। विवधवीवधशब्दौ उभयतोबद्धशिक्ये स्कंधवाह्ये काष्ठे वर्तते। निर्वृत्तेऽक्षद्यू
तादिभ्यः। अक्षद्यूतेन निर्वृत्तं आक्षद्यूतिकं वैरं। संसृष्टे। दध्ना संसृष्टं दाधिकं। लवणाल्लुक्। ल
वणेन संसृष्टो लवणः सूपः। मुद्गादण्। मौद्ग ओदनः। उञ्छति। बदराण्युञ्छति बादरिकः। रक्ष
ति। समाजं रक्षति सामाजिकः। शब्ददर्दुरं करोति। शब्दं करोति शाब्दिकः। दार्दुरिकः। पक्षिमत्स्य

राम ५७

मृगान्हंति।स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं मत्स्यपर्यायेषु मीनस्यैव।पक्षिणो हं
ति पाक्षिकः।शाकुनिकः।मायूरिकः।मात्स्यिकः।मैनिकः।शाकुलिकः।मार्गिकः।हारिणिकः।सारंगि
कः।सौरंगिकः।धर्मं चरति।धार्मिकः।अधर्माच्चेति वक्तव्यं।आधार्मिकः।तदस्य पण्यं।अपूपाः
पण्यमस्य आपूपिकः।लवणाट्ठञ्।लावणिकः।शिल्पं।मृदंगवादनं शिल्पमस्य मार्दंगिकः।प्रह
रणं।असिः प्रहरणमस्य आसिकः।धानुष्कः।शक्तियष्ट्योरीकक्।शाक्तीकः।याष्टीकः।अस्ति
नास्ति दिष्टं मतिः।अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः।नास्तीति मतिर्यस्य स नास्तिकः।
दिष्टमिति मतिर्यस्य दैष्टिकः।शीलं।अपूपभक्षणं शीलमस्य आपूपिकः।छत्रादिभ्यो णः।गुरोर्दो
षाणामावरणं छत्रं।तच्छीलमस्य छात्रः।तत्र नियुक्तः।आकरे नियुक्तः।आकरिकः।निकटे व
सति नैकटिको भिक्षुः॥ ॥इति ठगधिकारः॥ ॥प्राग्घिताद्यत्।तस्मै हितमित्य
तः प्राक् यदधिक्रियते।तद्वहति रथयुगप्रासंगं।रथं वहति रथ्यः।युग्यः।प्रासंग्यः।धुरो यड्ढ
कौ।धुर्यः।धौरेयः।हलसीराट्ठक्।हलं वहति हालिकः।सैरिकः।विध्यत्यधनुषा।द्वितीयोता

मकौ॰उ॰ ५८
58

द्विध्यतीत्यर्थे यत् न चेत्तत्र धनुःकरणं। पादौ विध्यतीति पद्याः शर्कराः। नौवयोधर्मविषमूलमूल
सीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु। नावा तार्यं नाव्यं जलं। वयसा
तुल्यो वयस्यः। धर्मेण प्राप्यं धर्म्यं। विषेण वध्यो विष्यः। मूलेन आनाम्यं मूल्यं। मूलेन समो मूल्यः।
सीतया समितं सीत्यं क्षेत्रं। तुलया संमितं तुल्यं। तत्र साधुः सामन्ये अग्र्यः। कर्मण्यः। शर
ण्यः। सभाया यः। सभ्यः।। ।।इति यतो विधिः।। ।।प्राक्क्रीताच्छः। तेन क्रीतमित्य
तः प्राक् छोऽधियते। उगवादिभ्यो यत्। प्राक्क्रीतादित्येव। उवर्णान्ता गवादिभ्यश्च यत्। छस्याप
वादः। नाभि नभं च। नभ्योऽक्षः। नभ्यमञ्जनं। रथनाभावेवेदं। शुनः संप्रसारणं वा च दीर्घत्वं।।
शून्यं। शुन्यं। ऊधसोऽनङ् च। ऊधन्यः। कंबलाच्च संज्ञायां। यत्। कंबल्यमूर्णा पलशतं। संज्ञा
यां किं। कंबलीया ऊर्णा। विभाषा हविरपूपादिभ्यः। आमिक्ष्यं दधि आमिक्ष्यं दधि आमिक्षी
यं। पुरोडाश्यास्तंडुलाः। पुरोडाशीयाः। अपूपीयं। अपूपो। तस्मै हितं। वत्सेभ्यो हितो वत्सीयः
गोधुक्। शंकव्यं दारु। गव्यं। हविष्यं। शरीरावयवाद्यत्। दंत्यं। कंठ्यं। नस्यं। अजाविभ्यां

राम
५८

यम्नू। अजथ्या। यूथ्यिः। अविथ्या। आत्मन्विश्वजनभोगोत्तरपदात्खः। आत्माध्वानौ खे। प्रकृत्या
स्तः। आत्मने हितं आत्मनीनं। विश्वजनीनं। कर्मधारयादेवेष्यते। अन्यत्र विश्वजनीयं। पंचज
नादुपसंख्यानं। पंचजनीनं। मातृभोगीणः। आचार्यादणत्वं च। आचार्यभोगीनः॥ ॥छ
यतोः पूर्णावधिः॥ ॥प्राग्वतेष्ठञ्॥ तेन तुल्यमिति यतः प्राक् ठञधिक्रियते। आर्हादगोपुच्छ
संख्यापरिमाणाट्ठक्। तदर्हतीत्येतदभिव्याप्य ठञधिकारमध्ये ठञोपवादः ठगधिक्रियते पु
च्छादीन्वर्जयित्वा। असमासे निष्कादिभ्यः। आर्हादित्येतत्तेन क्रीतमिति यावदनुवर्तते। निष्का
दिभ्योऽसमासे ठगार्हीयेष्वर्थेषु। निष्केण क्रीतं नैष्किकं। समासे तु ठञ्। परिमाणान्तस्या
संज्ञाशाणयोः उत्तरपदवृद्धिर्ञिदादौ। परमनैष्किकं। शताच्च ठन्यतावशते। शत्यं। शतिकं। अ
शते किं। संख्याया अतिशदन्तायाः कन्। आर्हीयेष्वर्थे। शतं परिमाणमस्य शतकः संघः। बहु
कः। त्यन्तायाः किं साप्ततिकः। शदन्तायाः चात्वारिंशत्कः। वतोरिड्वा। वत्वन्तात्कन इड्वा। तावत्कः॥
तावतिकः। कंसाट्टिठन्। कंसिकः। अर्धाच्च। अर्धिकः। अध्यर्धपूर्वद्विगोर्लुगसंज्ञायां। अध्यर्ध

मको०तु
५९
59

पूर्वाद्द्विगोश्चपरस्याहीयस्य लुक् । अध्यर्धकंसं । द्विकंसं । संज्ञायां तु पांचकलापिकं । तेन क्री
तं । टञ् । गोपुच्छेन क्रीतं गौपुच्छिकं । सामतिकं । प्रास्थिकं । टक् । नैष्किकं । तस्येश्वरः । सर्वभूमिपृ
थिवीभ्यामणञौ स्तः । अनुशतिकादीनां च । सर्वभूमेरीश्वरः । सार्वभौमः पार्थिवः । तदस्य परिमा
णं । प्रस्थं परिमाणमस्य प्रास्थिकः राशिः । स्तोमे डविधिः । पंचदश मंत्राः परिमाणमस्य पांचदशः ।
सप्तदशः स्तोमयागेषु छंदोगैः क्रियमाणा पृष्ठादिसंज्ञिका स्तुतिः स्तोमः । पंक्तिविंशतित्रिंशच्च
त्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं ॥ एते रूढशब्दा निपात्यंते । तदर्हति । श्वेतच्छत्र
मर्हति श्वैतच्छत्रिकः ॥ दंडादिभ्यः । एभ्यो यत् । दंडमर्हति दंड्यः । अर्घ्यः । वध्यः तेन निर्वृत्तं । अन्हा
निर्वृत्तमान्हिकं ॥ ॥ इति ठञ्ठकोरवधिः ॥ ॥ तेन तुल्यं क्रिया चेद्वतिः ब्राह्मणेन
तुल्यं ब्राह्मणवदधीते । क्रिया चेत्किं । गुणतुल्ये माभूत् । पुत्रेण तुल्यः स्थूलः । तत्र तस्येव । मथु
रायामिव मथुरावत् स्रुघ्ने प्राकारः । चैत्रस्येव चैत्रवत् मैत्रस्य गावः । तस्य भावस्त्वतलौ ॥
प्रकृतिजन्यबोधे प्रकारो भावः । गोर्भावः गोत्वं । गोता । त्वांतं क्लीबं । आचत्वात् । ब्राह्मणस्त्व इत्याः राम ५९

प्राकू त्वतलावधि स्त्रियेते। अपवादैः सह समावेशार्थमिदं। चकारान्नञ्स्नञोरपि समावेशार्थः
स्त्रियाः भावः स्त्रैणं। स्त्रीत्वं। स्त्रीशता। पौंस्नं पुंस्त्वं पुंस्ता। पृथ्व्यादिभ्य इमनिज्वा॥ वावचनमण
दिसमावेशार्थं। रऋतो हलादेर्लघोः। इष्ठेमेयःसु। टेः। लोपइष्ठेमेयःसु। पृथुमृदुभृशकृशदृढ
परिवृढानामेव रत्वं। पृथोर्भावः प्रथिमा। पार्थवं। म्रदिमा। मार्दवं। वर्णदृढादिभ्यः ष्यञ्च। चादिम
निच्। शौक्ल्यं। शुक्लिमा। दार्ढ्यं। द्रढिमा। गुणवचनब्राह्मणादिभ्यः कर्मणि च। चाद्भावे। जडस्य
भावः कर्म वा जाड्यं। मौढ्यं। ब्राह्मण्यं। आकृतिगणोऽयं। चतुर्वर्णादीनां स्वार्थ उपसंख्यानं। चातु
र्वर्ण्यं। चातुराश्रम्यं। त्रैस्वर्यं। षाड्गुण्यं। सैन्यं। सांनिध्यं। औपम्यं। त्रैलोक्यमित्यादि। स्तेनाद्यन्नलो
पश्च। नेति संघातग्रहणं। स्तेनस्य भावः कर्म वा स्तेयं। सख्युर्यः। सख्यं। कपिज्ञात्योर्ढक्। कापेयं। ज्ञा
तेयं। पत्यन्तपुरोहितादिभ्यो यक्। सैनापत्यं। पौरोहित्यं। राज्ञोऽसे। राजशब्दोऽसमासे यकं लभ
त इत्यर्थः। राज्ञो भावः कर्म वा राज्यं। समासे तु ब्राह्मणादित्वात् ष्यञ्। आधिराज्यं। प्राणभृज्जातिव
योवचनोद्गात्रादिभ्योऽञ्। प्राणभृज्जातिः। आश्वं। वयोवचनः। कौमारं। औद्गात्रं। औन्नेत्रं। सौष्ठ

म.कौ.उ.
६०
60

कं। हायनांतयुवादिभ्योऽण्। द्वैहायनं। त्रैहायनं। यौवनं। स्थाविरं। श्रोत्रियस्य यलोपश्च। श्रौ
त्रं। कुशल निपुण चपल पिशुन कुतूहल क्षेत्रज्ञाः युवादिषु ब्राह्मणादिषु पठ्यंते। कौशल्यं। कौशल
मित्यादि। इगंताच्च लघुपूर्वात्। शुचेर्भावः कर्म वा शौचं। मौनं। योपधाद्गुरूपोत्तमाद्वुञ्। रामणीय
कं। आभिधानीयकं। सहायाद्वा। साहाय्यं। साहायकं। द्वंद्वमनोज्ञादिभ्यश्च। शैष्योपाध्यायिका। मा — शैष्योपाध्यायिका
मानोज्ञकं — नोज्ञकं। ॥इति त्वतलोरधिकारः॥ ॥धान्यानां भवने क्षेत्रे खञ्। मुद्गानां भवनं क्षे
त्रं मौद्गीनं। व्रीहिशाल्योर्ढक्। व्रैहेयं। शालेयं। यवयवकषष्टिकाद्यत्। यव्यं। यवक्यं। षष्टिक्यं। विभा
षा तिलमाषोमाभंगाणुभ्यः। पक्षे खञ्। तिल्यं। तैलीनं। माष्यं। माषीणं। उम्यं। औमीनं। भंग्यं।
भांगीनं। अणव्यं। आणवीनं। तत्सर्वादेः पथ्यंगकर्मपत्रपात्रं व्याप्नोति। सर्वादेः पथ्यादिभ्यो द्विती
यांतात्खः। सर्वपथान्व्याप्नोति सर्वपथीनः। सर्वांगीणः। सर्वकर्मीणः। सर्वपत्रीणः। सर्वपात्रीणः।
हैयंगवीनं संज्ञायां। नवनीते निपात्यते। तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ। पील्
नां पाकः पीलुकुणः। कर्णस्य मूलं कर्णजाहं। पक्षात्तिः। मूले इत्यनुवर्तते। पक्षस्य मूलं पक्षतिः। तेन वि — राम
६०

त्तश्चुंचुप्चणपौ। यकारप्रत्यययोरादौ लुप्तनिर्दिष्टः। तेन चस्येन लं। विद्यया वित्तः विद्याचुंचुः। वि
द्याचणः। वेःशालच्छंकटचौ। क्रियाविशिष्टसाधनवाचकात्स्वार्थे। विस्तृतं विशालं विशंकटं। संप्रो
दश्च कटच्। संकटं। प्रकटं। उत्कटं। चाद्विकटं। अलाबूतिलोमाभंगाभ्यो रजस्युपसंख्यानं। अला
बूनां रजः अलाबूकटं। तिलकटं। गोष्ठजादयः स्थानादिषु पशुनामभ्यः। गवां स्थानं गोगोष्ठं। अ
श्वगोष्ठं। संघाते कटच्। अवीनां संघातः। अविकटः। विस्तारे पटच्। अविपटः। द्वित्वे गोयुगच्॥
द्वावुष्ट्रौ उष्ट्रगोयुगं। षट्त्वे षड्गवच्। अश्वषड्गवं। स्नेहे तैलच्॥ तिलतैलं। सर्षपतैलं। अवात्कुटार
च्च। चात्कटच्। अवाचीनः अवकुटारः। अवकटः। नते नासिकायाः संज्ञायां टीटच् नाटच् भ्रटचः।
अवादेव। नतं नमनं। नासिकाया नतं अवटीटं। अवनाटं। अवभ्रटं। तद्योगान्नासिका अवटी
टा। पुरुषोऽप्यवटीटः। उपाधिभ्यां त्यकन्नासन्नारूढयोः। पर्वतस्यासन्नं स्थलं उपत्यका। आरूढं स्थ
लमधित्यका। कर्मणि घटोऽठच्। कर्मणि घटते कर्मठः। तदस्य संजातं तारकादिभ्य इतच्। तार
काः संजाता अस्य तारकितं नभः॥ पंडितः। आकृतिगणोऽयं। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। ऊ

रू, प्रमाणमस्य ऊरुद्वयसं। ऊरुदघ्नं। ऊरुमात्रं। प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम। ऊर्ध्वमा
नं किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात्। संख्या बाह्या तु सर्वतः॥ पुरुषहस्ति
भ्यामण् च। पुरुषः प्रमाणमस्य पौरुषं। पुरुषद्वयसं। यत्तदेतेभ्यः परिमाणे वतुप्। यत् परिमाणमस्य
यावान्। तावान्। एतावान्। किमिदंभ्यां वो घः। आभ्यां वतुप् वस्य च घः। इदं किमोरीश्की॥ दृग्दृग्दृश
वतुषु। कियान्। इयान्। किमः संख्यापरिमाणे डति च। चाद्वतुप् तस्य च घः। का संख्या येषां ते क
ति। कियंतः। संख्याया अवयवे तयप्। पंच अवयवा अस्य पंचतयं। द्वित्रिभ्यां तयस्यायज्वा। द्वयं।
द्वितयं। त्रयं। त्रितयं। उभादुदात्तो नित्यं। उभयं। तदस्मिन्नधिकमिति दशांताड्डः। एकादश अ
धिका अस्मिन् एकादशं। शतसहस्रयोरेव नेह। एकादशाधिका अस्यां विंशत्यां। प्रकृतिप्रत्यया
र्थयोः समानजातीयत्व एवेष्यते। नेह। एकादश माषा अधिका अस्मिन् सुवर्णशते। शदंतविंश
तेश्च। — स्यादुक्तेर्थे। त्रिंशदधिका अस्मिन् त्रिंशं शतं। विंशं। तस्य पूरणे डट्। संख्याया इत्येव। ए
कादशानां पूरण एकादशः। नांतादसंख्यादेर्मट्। डटो मडागमः। पंचानां पूरणः पंचमः। नांतात् किं॥

विंशः। असंख्यादेः किं। एकादशः। षट्कतिपयचतुरां थुक्। डटि षण्णां पूरणः षष्ठः। कतिथः। कतिप
यशब्दस्यात एव डट्। कतिपयथः। चतुर्थः। चतुरश्छयतावाद्यक्षरलोपश्च। तुरीयः। तुर्यः। बहुपूग
गणसंघस्य तिथुक्। डटि। बहुतिथः। वतोरिथुक्। डटि। यावतिथः। द्वेस्तीयः। डटोपवादः। द्वयोः पू
रणो द्वितीयः। त्रेः संप्रसारणं च। तृतीयः। इह हल इति दीर्घो न। द्वितीयतृतीयेति निर्देशात्। विंश
त्यादिभ्यस्तमडन्यतरस्यां। डटः। विंशतितमः। विंशः। एकविंशतितमः। एकविंशः। नित्यं शतादिमा
सार्द्धमाससंवत्सराच्च। शतस्य पूरणः शततमः। एकशततमः। मासादेरत एव डट्। मासतमः। षष्ट्यादे
श्चासंख्यादेः। विंशत्यादिभ्य विभ्य विकल्प एव। एकषष्टः। एकषष्टितमः। मतौ छः सूक्तसाम्नोः। मत्व
र्थे छः। अच्छावाकशब्दोऽस्यास्मिन्नच्छावाकीयं सूक्तं। वारवंतीयं साम। श्रोत्रियंश्छन्दोऽधीते। श्रोत्रि
यः। वेत्यनुवृत्तेः छांदसः। पूर्वादिनिः। पूर्वं कृतमनेन पूर्वी। सपूर्वाच्च। कृतपूर्वी। इष्टादिभ्यश्च। इष्टमने
न इष्टी। अधीती। अनुपद्यन्वेष्टा। अनुपदमन्वेष्टा अनुपदी गवां। साक्षाद्द्रष्टरि संज्ञायां। साक्षाद्द्र
ष्टा साक्षी। तदस्यास्त्यस्मिन्निति मतुप्। गावः अस्य अस्मिन् वा सन्ति गोमान्। तसौ मत्वर्थे। तांतसांतौ

मकौ॰ ६२ भसंज्ञौ स्तो मत्वर्थे प्रत्यये ॥ संप्रसारणं । विदुष्मान् । गुणवचनेभ्यो मतुपो लुगिष्टः । शुक्लो गुणः
स्यास्तीति शुक्लः पटः । कृष्णः । प्राणिस्थादातो लजन्यतरस्यां ॥ चूडालः । चूडावान् प्राणिस्थात्किं ॥
शिखावान् दीपः । प्राण्यंगादेव नेह मेधावान् । सिध्मादिभ्यश्च ॥ सिध्मलः । सिध्मवान् । वात
62 दंतबललललाटानामूङ् । वातूलः । दंतूलः । बलूलः । ललाटूलः । वत्सांसाभ्यां कामबले ॥ वत्साय
था ससेयं कामवति बलवति चार्थे । वत्सलः । अंसलः । फेनादिलच्च । चाल्लच् । अन्यतरस्यां ग्र
हणं मतुसमुच्चयार्थमनुवर्तते । फेनिलः । फेनलः । फेनलः । फेनवान् । वान् ॥ लोमादिपामादिपिच्छा
दिभ्यः शनेलचः । लोमादिभ्यादिभ्यः शः । लोमवान् । रोमशः । रोमवान् । पामादिभ्यो नः । यामनः ।
अंगात्कल्याणे । अंगना । लक्ष्म्या अच्च । लक्ष्मणः । पिच्छादिभ्य इलच् । पिच्छिलः । पिच्छवान् । उरसि
लः । उरस्वान् । प्रज्ञाश्रद्धार्चाभ्यो णः । प्राज्ञो व्याकरणे । प्राज्ञा श्राद्धः । आर्चः । वृत्तेश्च वार्तः । तपः
सहस्राभ्यां विनीनी । विनीन्योरिकारो न कार परित्राणार्थः । तपस्वी सहस्री । अण्च । तापसः । सा
हस्रः । ज्योत्स्नादिभ्य उपसंख्यानं । ज्यौत्स्नः । तामिस्रः । सिकताशर्कराभ्यां च । सैकतो घटः ॥ राम ६२

शार्करः। देशे लुबिलचौ च। चाद् एमतुप्च। सिकताः संत्यस्मिन्देशे सिकता। सिकतिलः। सैकताः।
सिकतावान्। एवं शर्करेत्यादि। दंतउरच्। उन्नता दंता अस्य दंतुरः। ऊषसुषिमुष्कमधोरः। ऊषरः।
सुषिरः। मुष्कोंडः। मुष्कः। मधुरः। रप्रकरणे खमुखकुंजेभ्य उपसंख्यानं। खरः। मुखरः। कुंजोह
स्तिहनुः। कुंजरः। नगपांसुपांडुभ्यश्च। नगरं। पांसुरः। पांडुरः। कच्छ्वा ह्रस्वत्वं च। कच्छुरः। द्युद्रुभ्यां मः॥
द्युमः। द्रुमः। केशाद्वोन्यतरस्यां॥ प्रकृतेनान्यतरस्यां ग्रहणेन मतुपि सिद्धे पुनर्ग्रहणं इनिठनोः स
मावेशार्थं। केशवः। केशी। केशिकः। केशवान्। अन्येभ्योपि दृश्यते। मणिवः नागविशेषः। हिर
ण्यवो निधिविशेषः। अर्णसो लोपश्च। अर्णवः। गांडयजगात्संज्ञायां। ह्रस्वदीर्घयोर्यणा तंत्रे
णनिर्देशः। गांडीवं। गांडिवं। अजगवं। पिनाकः। कांडांडादीरन्नीरचौ। कांडीरः। आंडीरः। रजः कृ
ष्यासुतिपरिषदो वलच्। रजस्वला। कृषीवलः। वले इति दीर्घः। आसुतीवलः। शौंडिकः। परिषद्व
लः। पर्षदिति पाठांतरं। पर्षद्वलः। अन्येभ्योपि दृश्यते। भ्रातृवलः। पुत्रवलः। शत्रुवलः। दंतशिखा
त्संज्ञायां। दंतावलो हस्ती। शिखावलः केकी। अत इनिठनौ। दंडी। दंडिकः। व्रीह्यादिभ्यश्च। व्रीही॥

व्रीहिकः। तुन्दादिभ्य इलच्च। चादिनिठनौ। मतुप् च। तुन्दिलः। तुन्दी। तुन्दिकः। तुन्दवान्। रूपादाहतप्रशं-
सयोर्यप्। आहतं रूपमस्यास्तीति रूप्यः कार्षापणः। प्रशस्तं रूपमस्यास्तीति रूप्यो गौः। अन्ये-
भ्योऽपि दृश्यते। हिम्याः पर्वताः। गुण्याः पर्वताः ब्राह्मणाः। अस्मायामेधास्रजो विनिः। यशस्वी। यश-
स्वान्। मायावी। व्रीह्यादिपाठात् मायी। मायिकः। स्रग्वी। शृङ्गवृन्दाभ्यामारकन्। शृङ्गारकः। वृन्दा-
रकः। फलबर्हाभ्यामिनच्। फलिनः। बर्हिणः। हृदयाच्चालुरन्यतरस्याम्। हृदयालुः। हृदयी। हृदयिकः।
हृदयवान्। शीतोष्णतृप्रेभ्यस्तदसहने। शीतं न सहते शीतालुः। उष्णालुः। तृप्रः पुरोडाशः। तं न स-
हते तृप्रालुः। तप् पर्वमरुद्भ्याम्। पर्वतः। मरुत्तः। ऊर्णाया युस्। ऊर्णायुः। वाचो ग्मिनिः। वाग्मी। आल-
जाटचौ बहुभाषिणि। कुत्सित इति वक्तव्यम्। कुत्सितं बहु भाषते वाचालो वाचाटः। यस्तु सम्यग्बहु ल-
वदति तत्र वाग्मीत्येव। स्वामिन्नैश्वर्ये। ऐश्वर्यवाचकात्स्वशब्दात्स्वार्थे आमिनिच्। अर्शआदिभ्यो
ऽच्। अर्शांस्यस्य विद्यन्ते अर्शसः। आकृतिगणोऽयम्। वातातीसाराभ्यां कुक्च। चादिनिः। वातकी।
अतीसारकी। पिशाचाच्च। पिशाचकी। हस्ताज्जातौ। हस्ती। वर्णाद्ब्रह्मचारिणि। वर्णी। कंशंभ्यां बभ

युस्तितुतयसः। कमित्युदकसुखयोः॥ शमिति सुखे। आभ्यां सप्तप्रत्ययाः स्युः। युसूयसोः॥
सकारः पदत्वार्थः। कंवः। कंभः। कंयुः। कंतिः। कंतुः। कंतः। कंयः। एवं शंवः इत्यादि। तुंदिवलिवटेर्भः॥
तुंदिभः। वलिभः। वटिभः। अहंशुभमोर्युस्। अहंयुः। अहंकारवान्। शुभान्वितः॥ ॥इति
मत्वर्थीयाः॥ ॥प्राग्दिशो विभक्तिः। दिक्शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः। प्रत्ययविभक्तिसं
ज्ञाः स्युः। अथ स्वार्थिकाः॥ ॥किंसर्वनामबहुभ्योऽद्व्यादिभ्यः। किमः सर्वनाम्नो बहुशब्दाच्चेति
प्राग्दिशो विभक्तियेते। पंचम्यास्तसिल्। पंचम्यंतेभ्यः किमादिभ्यस्तसिल्वा। कुतिहोः। किमः कुः तादौ
हादौ च विभक्तौ। कुतः कस्मात्। इदम इश्। प्राग्दिशीये। इतः। अन्। एतदः प्राग्दिशीये। अनेका
ल्त्वात्सर्वादेशः। अतः। अमुतः। यतः। ततः। बहुतः। द्व्यादेस्तु न। द्वाभ्यां। पर्यभिभ्यां च। तसिल्। परितः।
सर्वत इत्यर्थः। अभितः। उभयत इत्यर्थः। सप्तम्यास्त्रल्। कुत्र। यत्र। बहुत्र। इदमो हः। त्रलोऽपवादः।
इह। किमोऽत्। वा स्यात्। क्वाति। किमः। क्व। कुत्र। इतराभ्योऽपि दृश्यंते। पंचमीसप्तमीतरविभक्त्यंताद
पि तसिलादयो दृश्यंते। दृशिग्रहणाद्भवदादियोग एव। स भवान्। ततो भवान्। तत्र भवान्॥

मकौ॰उ॰ तो भवंतः। ततो भवंतः। तत्र भवंतः। एवं दीर्घायुः देवानांप्रियः। आयुष्मान्। सर्वैकान्यकिंयत्तदः का
६८ ले दा। सप्तम्यंतेभ्य एभ्यः कालार्थे दा स्यात्। आयुष्मान्। सर्वस्य सोन्यतरस्यां दि। दादौ प्राग्दि
शीये सर्वस्य सो वा। सर्वस्मिन्काले सदा। सर्वदा। एकदा। अन्यदा। कदा। यदा। तदा। काले किं। सर्व
64 त्र देशे। इदमो र्हिल्। सप्तम्यंतात्। एतेतौ रथोः। इदम एतइत्। एतौ स्तः रेफादौ थकारादौ च प्राग्दि
शीये परे। अस्मिन्काले एतर्हि। काले किं। इह देशे। अधुना। इदमः निपात्यते। दानीं च। इदमो
दानीं प्रत्ययः काले। इदानीं। तदो दा च। तदा। तदानीं। अनद्यतने र्हिलन्यतरस्यां। कर्हि। कदा। य
र्हि। यदा। तदा। एतदः। एत इत्। एतौ स्तः रेफादौ थादौ च प्राग्दिशीये। एतस्मिन्काले एतर्हि। स
द्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युः। एते
निपात्यंते। द्युश्चोभयाद्वक्तव्यः। उभयद्युः। प्रकारवचने थाल्। प्रकारवृत्तिभ्यः किमादिभ्यस्था
ल्। तेन प्रकारेण तथा। यथा। इदमस्थमुः। थालोपवादः। एतदोपि वाच्यः। अनेन एतेन वा प्रका
रेण इत्थं। किमश्च। केन प्रकारेण कथं॥ ॥इति प्राग्दिशीयाः॥ ॥दिक्शब्देभ्यः राम
६८

सप्तमीपंचमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। सप्तम्यंतेभ्यो दिशि रूढेभ्यः दिग्देशकालवृत्ति
भ्यः स्वार्थेऽस्तातिः। पूर्वाधरावराणामसि पुरधवश्चैषां। एभ्योऽस्तात्यर्थेऽसिः। तद्योगे चैषां पुर् अध्
अव् इत्यादेशाः स्युः। अस्ताति च। पूर्वादीनां पुरादयः स्युः। पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् पुरः पुरस्ता
त्। अधः अधस्तात्। अवः। विभाषावरस्य। अस्ताती अव्। अवस्तात्। अवरस्तात्। एवं देशका
ले च। दिशि रूढेभ्यः किं। ऐंद्र्यां वसति। सप्तम्याद्यंतेभ्यः किं। पूर्वं ग्रामं गतः। दिगादिवृत्तिभ्यः किं। पूर्व
स्मिन्गुरौ वसति। अस्ताति च इति ज्ञापकादसिरस्तातिं न बाधते। दक्षिणोत्तराभ्यामतसुच्। अस्ताते
रपवादः। दक्षिणतः। उत्तरतः। विभाषा परावराभ्यां। परतः। परस्तात्। अवरतः। अवरस्तात्। अंचे
र्लुक्। अंचत्यंताद्दिक्शब्दादस्तातेर्लुक्। प्राक्। उदक्। उपर्युपरिष्टात्। निपातावेतौ। पश्चात्।
उत्तराधरदक्षिणादातिः। उत्तरात्। अधरात्। दक्षिणात्। एनबन्यतरस्यामदूरेऽपंचम्याः।
उत्तरादिभ्य एनब्वाऽवध्यवधिमतोः सामीप्ये। पंचम्यंतात्तु न। उत्तरेण। अधरेण। दक्षिणेन। यथ
क्ष्येयासंप्रत्ययानद्दके चिद्दिक्शब्दमात्रादेनपमाहुः। पूर्वेण ग्रामं। दक्षिणा। दक्षिणादाच्। असा

म॰कौ॰उ
६५
65

तेर्विषये। दक्षिणेन वसति। अपंचम्या इत्येव। दक्षिणत आगतः। आहि च दूरे। दक्षिणाहि। चात् आच्। दक्षि
णाहि। दक्षिणा। उत्तराच्च। उत्तराहि। उत्तरा। संख्याया विधार्थे धा। क्रियाप्रकारे वर्त्तमानात्संख्याश
ब्दात्स्वार्थे धा। चतुर्धा। एकाद्धो ध्यमुञन्यतरस्याम्। एकध्यं। एकधा। द्वित्र्योश्च धमुञ्। आभ्यां धाइ
त्यस्य धमुञ् वा। द्वैधं। द्विधा। त्रैधं। त्रेधा। एधाच्च। द्वेधा। त्रेधा। याप्ये पाशप्। कुत्सितो भिषक् भिष
क्पाशः। तीयादीकक् स्वार्थे वाच्यः। द्वितीयकः। द्वितीयः। न विद्यायाः। द्वितीया विद्येत्येव। एकादाकि
निच्चासहाये। चात् कन्लुकौ। एकः। एकाकी। एककः। भूतपूर्वे चरट्। आढ्यो भूतपूर्वः। आढ्यचरः। ष
ष्ठ्या रूप्य च। षष्ठ्यन्ताद्भूतपूर्वेऽर्थे रूप्यः चरट् च। कृष्णस्य भूतपूर्वा गौः कृष्णरूप्या। कृष्णचरः। अ
तिशायने तमबिष्ठनौ। अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अयमेषामतिशयेनाढ्यः आढ्यतमः।
लघुतमो। लघिष्ठः। तिङश्च। तिङन्तादतिशये द्योतितमप्। तरप्तमपौ घः। किमेत्तिङव्ययघादाम्व
द्रव्यप्रकर्षे। किमेत्तिङव्ययाच्च यो घस्तदन्तादामुर्न तु द्रव्यप्रकर्षे। किंतमां। प्राह्णेतमां। पच
तितमां। उच्चैस्तमां। द्रव्यप्रकर्षे तु उच्चैस्तरुः। द्विवचनविभज्योपपदे तरबीयसुनौ। द्वयोरेकस्यातिश

राम
६५

यविभक्तव्ये चोपपदे स्तुसिङ्तादेतौ स्तः पूर्वयोरपवादः। अयमनयोरतिशयेन लघुः। लघुतरो ल
घीयान्। उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः। अजादी गुणवचनादेव। इष्ठन्नीयसुनौ नेह। पाचे
कतरः पाचकतमः। प्रशस्यस्य श्रः। इष्ठेयसोः परतः। प्रकृत्यैकाच्। इष्ठादिष्वेकाच् प्रकृत्या। श्रेष्ठः श्रे
यान्। ज्य च। प्रशस्यस्य ज्यादेशः इष्ठेयसोः। ज्येष्ठः। ज्यादादीयसः। आदेः परस्य। ज्यायान्। वृद्धस्य
च। ज्यादेशः अजाद्योः। ज्येष्ठः। ज्यायान्। अन्तिकबाढयोर्नेदसाधौ। अजाद्योः। नेदिष्ठः। नेदीयान्॥
साधिष्ठः। साधीयान्। स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः। एषां पर
यणादि लुप्यते पूर्वस्य च गुणः इष्ठादिषु। स्थविष्ठः। दविष्ठः। यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षेपिष्ठः। क्षोदि
ष्ठः। एवमीयसुन्। ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वात् ह्रसिमा। क्षेपिमा। क्षोदिमा। प्रियस्थिरस्फिरोरु
बहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः। प्रियादीनां प्रादयः स्यु
इष्ठादिषु। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रपिष्ठः। द्राघिष्ठः। वृन्दिष्ठः। एवमीय
सुन्। प्रियोरुबहुलगुरुदीर्घादीनां पृथ्वादित्वात् प्रेमेत्यादि। बहोः लोपो बहोश्च भूरादेशः। भूमा। इष्ठ

स्य यिट् वा बहोः परस्य इष्ठस्य लोपः यिडागमश्च । भूयिष्ठः । विन्मतोर्लुक् । इष्ठेयसोः अतिशयेन
स्रग्वी स्रजिष्ठः । स्रजीयान् । अतिशयेन त्वग्वान् । त्वचिष्ठः । त्वचीयान् । प्रशंसायां रूपप् । सुबन्तात्ति
ङन्ताच्च । प्रशस्तः पटुः पटुरूपः । परूपं । ईषदसमाप्तौ कल्पब्देश्यदेशीयरः । ईषन्न्यूनो विद्वान् विद्वत्कल्पः ।
विद्वद्देश्यः । विद्वद्देशीयः । पचतिकल्पं । विभाषा सुपो बहुच् पुरस्तात्तु । ईषदूनः पटुः बहुपटुः पटुकल्पः ।
सुपक्किं । यजतिकल्पं । प्रागिवात्कः । इवे प्रतिकृतौ इत्यतः प्राक्काधिकारः । अव्ययसर्वनाम्नामक
च् प्राक्टेः । कायवादः । तिङश्चेत्यनुवर्तते । कस्य चदः । कोनाव्ययस्य दादेशोऽकच्च । अज्ञाते कस्याय
कस्यायमश्वोऽश्वकः । उच्चकैः । नीचकैः । सर्वके । पचतकि । धकित् । कुत्सिते । कुत्सितोऽश्वोऽश्वकः ॥
उच्चकैः । अल्पे । अल्पं तैलं तैलकं । ह्रस्वे । ह्रस्वो वृक्षो वृक्षकः । अस्मिन्प्रकरणे ठाजादौ प्रत्यये द्विती
याद्चः परस्य लोपो वा वाच्यः । देवदत्तकः । देवकः । लोपः पूर्वपदस्य च । दत्तकः । विनापि प्रत्ययं पूर्वो
त्तरपदयोर्लोपो वाच्यः । सत्यभामा । भामा । सत्या । कुटीशमीशुण्डाभ्यो रः । ह्रस्वा कुटीशमीरः । शुं
डारः । कुत्वा डुपच् । ह्रस्वा कुतूः कुतुपः । कुतूः कृत्तेः स्नेहपात्रं ह्रस्वा सा कुतुपः पुमान् । वत्सोक्षाश्व

र्षभेभ्यश्चतनुत्वे। ष्टरच्। वत्सतरः। उक्षतरः। ऋषभतरः। किंयत्तदोनिर्धारणे द्वयोरेकस्य डतरच्॥
अनयोः कतरो वैष्णवः। यतरः। ततरः। वा बहूनां जातिपरिप्रश्ने डतमच्। जातिपरिप्रश्न इति प्रत्या
ख्यानमकरे। कतमो भवतां कठः। यतमः। ततमः। वाग्रहणमकजर्थं। एकाच्च प्राचां। डतरच् डतम
चौ। अनयोरेकतरो मैत्रः। एषामेकतमः॥ ॥इति प्रागिवीयाः॥ ॥इवे प्रतिकृतौ। अश्व
इव प्रतिकृतिः। अश्वकः। शाखादिभ्यो यत्। शाखेव शाख्यः। मुख्यः। जघन्यः। अग्र्यः। शरण्यः। कुशा
ग्राच्छः। कुशाग्रीयः। तत्प्रकृतिवचने मयट्। प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनं। भावे
अधिकरणे वा ल्युट्। आद्ये प्रकृतमन्नं अन्नमयं। अपूपमयं। द्वितीये अन्नमयो यज्ञः। अपूपमयं
पर्व। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। अभ्यावृत्तिर्जन्म। क्रियाजन्मगणनवृत्तेः संख्यायाः
स्वार्थे कृत्वसुच्। पंचकृत्वो भुंक्ते। संख्यायाः किं। भूरिवारान् भुंक्ते। द्वित्रिचतुर्भ्यः सुच्। कृत्वसुचोऽप
वादः। द्विर्भुंक्ते। त्रिर्भुंक्ते। रात्सस्य। चतुर्भुंक्ते। एकस्य सकृच्च। सकृदादेशः। चात्सुच्। सकृद्भुंक्ते।
देवतान्तात्तादर्थ्ये यत्। तदर्थं देवतादर्थ्यं। अत एव स्वार्थे ष्यञ्। अग्निदेवतायै इदं अग्निदेवत्यं। पितृ

म॰कौ॰उ॰ ६७ 67

देवत्यं। पादार्घाभ्यां च। पादार्थमुदकं पाद्यं। अर्घ्यं। अतिथेर्यः। अतिथये इदमातिथ्यं। नवस्य
नू आदेशः त्नप्तनप्खाश्च वक्तव्याः। स्वार्थे। नूत्नं। नूतनं। नवीनं। भागरूपनामभ्यो धेयः। भा
गधेयं। रूपधेयं। नामधेयं। आग्नीध्रसाधारणादञ्। आग्नीध्रं। साधारणं। देवात्तल्। देव एव
देवता। अवेः कः। अविरेव अविकः। यावादिभ्यः कन्। याव एव यावकः। मणिकः। सर्वप्रातिपदिकेभ्यः
स्वार्थे कन्। बहुतरकं। मृदस्तिकन्। मृदेव मृत्तिका। सस्नौ प्रशंसायां। रूपोऽपवादः। प्रशस्ता मृत् मृ
त्स्ना। मृत्स्ना। प्रज्ञादिभ्यश्च। अण्। प्रज्ञ एव प्राज्ञः। दैवतः। बांधवः। पूगाञ्ञ्योऽग्रामणीपूर्वात्।।
स्वार्थे। नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः संघाः पूगाः। लौहितध्वज्यः। त्र्यादय
स्तद्राजाः। तद्राजस्येति लुक्। लोहितध्वजाः। व्रातात्ञ्फः। कापोतपाकाः। क्रौञ्जायनाः। ब्राध्नायनाः
।। इत्यादि। बह्वल्पार्थाच्छस्कारकादन्यतरस्यां। बहूनि ददाति बहुशः। अल्पशः। बह्वल्पार्थान्मं
गलामंगलवचनं। नेह। बहु ददात्यनिष्टेषु। अल्पमाभ्युदयिकेषु। संख्यैकवचनाच्च वीप्सा
यां। द्वौ द्वौ ददाति द्विशः। माषं माषं माषशः। प्रस्थशः। परिमाणशब्दा वृत्तावेकार्था एव। संख्यैक राम ६७

वचनात्किं । घटं घटं ददाति । वीप्सायां किं । द्वौ ददाति कारकादित्येव । द्वयोः स्वामी । प्रतियोगे पं
चम्यास्तसिः प्रतिना कर्मप्रवचनीयेन योगे या पंचमी विहिता तदंतात्तसिः । प्रद्युम्नः कृष्णतः प्र
ति । आद्यादिभ्यस्तासेरुपसंख्यानं । आदौ आदितः । मध्यतः । पृष्ठतः । पार्श्वतः । आकृतिगणोयं ।
स्वरेण स्वरतः । वर्णतः । कृभ्वस्तियोगे संपद्यकर्तरि च्विः । अभूततद्भाव इति वक्तव्यं । विकारा
त्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानान् विकारशब्दात्स्वार्थे च्विर्वा करोत्यादिभिर्योगे । अस्य च्वौ ।
ईत् । अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति । ब्रह्मीभवति । गंगीस्यात् । अव्ययस्य च्वावी
त्वं नेति वाच्यं । दोषाभूतमहः । दिवाभूता रात्रिः । क्यच्व्योश्च ॥ हलः परस्यापत्यप्रत्ययस्य लो
पः क्यच्व्योश्च परे । गर्गीभवति । च्वौ च । दीर्घः । शुचीभवति । पटूस्यात् । अरुर्मनश्चक्षुश्चेतोरहोर
जसां लोपश्च । चात् च्विः । अरूकरोति । उन्मनीकरोति । उच्चक्षूकरोति । विरहीकरोति । विरजी
करोति । विभाषा साति कार्त्स्न्ये । च्विविषये सातिर्वा स्यात्कार्त्स्न्ये । सात्यदाघोः कृत्स्नं शस्त्रमग्निः
संपद्यते अग्निसाद्भवति । अग्नीभवति । कार्त्स्न्ये किं । एकदेशेन शुक्लीभवति पटः । अभिविधौ

स॰त्वा॰
६८
68

संपद्यते च। संपद्यते च कृभ्वस्तिभिर्योगे सातिर्वा व्याप्तौ। पक्षे कृभ्वस्तियोगे च्विः संपद्यते तु वाक्यमेव।
अग्निसात्संपद्यते। अग्निसाद्भवति शस्त्रं। अग्नी भवति। जलसात्संपद्यते जली भवति लवणं। त-
दधीनवचने। सातिः कृभ्वस्तिभिः संपद्यते च योगे। राजसात्करोति। राजाधीनमित्यर्थः। देये त्रा
च तदधीने देये त्रा स्यात्सातिश्च कृञादियोगे। विप्राधीनं करोति विप्रत्रा करोति। विप्रत्रा संपद्यते।।
पक्षे विप्रसात्करोति। देये किं। राजसाद्भवति राष्ट्रं। देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्यो
र्बहुलं। एभ्यो द्वितीयांतेभ्यः सप्तम्यंतेभ्यश्च त्रा स्यात्। देवत्रा वंदे। रमे वा बहुलोक्के रन्यत्रापि
।। बहुत्रा जीवतो मनः। अव्यक्तानुकरणात् घजवरार्द्धादनितौ डाच्। घजवरं न्यूनं न तु न तो
न्यूनं। अनेकाजिति यावत्। तादृशमर्द्धं यस्य तस्मात् डाच् कृभ्वस्तिभिर्योगे। डाच्चि बहुलं द्वे
भवत इति डाच्चि विवक्षिते द्वित्वं। नित्यमाम्रेडिते डाचीति वक्तव्यं। डाच्परं यदाम्रेडितं तस्मिन्परे
पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति पयोः पः। पटपटा करोति। अव्यक्तानुकरणात् किं। दृषत्क-
रोति। घजवरार्द्धात् किं। श्रत्करोति। अवरेति किं। खरट् खरटा करोति। अनिताविति किं। पटिति क राम
६८

रोति। कृ– द्वितीयतृतीयशंबबीजात्कृषौ। द्वितीयादिभ्यो डाच् कृञ एव योगे। बहुलोक्ते स्यात्का
नुकरणाद्न्यस्य डाचि न द्वित्वं। द्वितीयं तृतीयं कर्षणं करोति द्वितीयाकरोति तृतीयाकरोति। शंबा
करोति। बीजाकरोति। संख्यायाश्च गुणान्तायाः द्विगुणाकरोति क्षेत्रं। समयाच्चयापनायां। कृषा
विति निवृत्तं। समयाकरोति। कालं यापयतीत्यर्थः। सपत्त्रनिष्पत्त्राद्तिव्यथने। सपत्त्राकरोति मृगं।
सपुंखशरप्रवेशनेन सपत्त्रं करोतीत्यर्थः। निष्पत्त्राकरोति। सपुंखस्य शरस्यापरपार्श्वे निर्गमनान्नि
ष्पत्त्रं करोतीत्यर्थः। अतिव्यथने किं। सपत्त्रं निष्पत्त्रं वा करोति भूतलं। निष्कुलान्निष्कोषणे। निष्कुला
करोति दाडिमं। निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति बहुव्रीहेर्डाच्। सुखप्रियादानुलो
म्ये। सुखाकरोति। प्रियाकरोति गुरुं। अनुकूलाचरणेनानन्दयतीत्यर्थः। दुःखात्प्रातिलोम्ये। दुःखा
रोति स्वामिनं पीडयतीत्यर्थः। शूलात्पाके। शूलाकरोति। शूलेन पचतीत्यर्थः। सत्यादशपथे। सत्या
करोति भाण्डं वणिक्। क्रेतव्यमिति तथ्यं करोतीत्यर्थः। शपथे तु सत्यं करोति विप्रः। मद्रात्परिवापणे।
मद्रशब्दो मंगलार्थः। परिवापणं मुंडनं। मद्राकरोति कुमारं। मारं। मांगल्यमुंडनेन संस्करोतीत्यर्थः।

भद्राद्वेतिवक्तव्यं। भद्रा करोतीत्यर्थः प्राग्वन्नापरिवापणे किं। भद्रं करोतीति। मद्रं करोतीति॥ ॥इति
म॰कौ॰उ॰ ६९ तद्धितप्रक्रिया॥ ॥सर्वस्य द्वे इत्यधिकृत्य। परेर्वर्जने। परि परि वंगेभ्यो वृष्टो देवः। उपर्यध्यध
सः सामीप्ये। उपर्युपरि ग्रामं। ग्रामस्योपरिष्टात्समीपदेश इत्यर्थः। अध्यधि सुखं। सुखस्योपरि
69 ष्टात्समीपकाले सुखमित्यर्थः। अधोधो लोकं। लोकस्याधस्तात्समीपदेश इत्यर्थः। वाक्यादेरामंत्रि
तस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु। सुंदर सुंदर वृथा ते सौंदर्यं। देव देव वंद्योऽसि। दुर्विनीत दु
र्विनीत इदानीं ज्ञास्यसि। धानुष्क धानुष्क वृथा ते धनुः। चोर चोर घातयामि त्वां। एकं बहुव्रीहिव
त्। तेन सुप्लोपपुंवद्भावौ। एकैकमक्षरं। एकैकया आहुत्या। आबाधे च। पीडायां द्वे स्तः। बहुव्रीहि
वच्च। गतः गत गतः। प्रकारे गुणवचनस्य। सादृशः ईषत्पटुरिति यावत्। आनुपूर्व्ये द्वे वाच्ये। मू
ले मूले स्थूलाः। स्थ्रमेण वृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः। सर्पः ३ बुध्यस्व ३। सर्पः ३ बुध्य
स्व ३। कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये। समासवच्च बहुलं। बहुलग्रहणादन्यपरयोर्न समासवत्
। इतरशब्दस्य तु नित्यं। असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः। अन्योन्यं विप्रा नमंति। अ राम
न्ययोऽन्ये गुणवचनस्य द्वे स्तः। तत्र कर्मधारयवत्। पटुपट्वी। ६९
पटुपटुः। पटुसदृ ८

न्योन्यै। अन्योन्येन कृतं। अन्योन्यस्मै देहीत्यादि। स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेरा
मूभावो वाच्यः। अन्योन्यां। अन्योन्यं। परस्परां। परस्परं। इतरेतरां। इतरेतरं वा इमे ब्राह्मण्यौ कुले
वा भोजयतः। दलद्वये टाबभावः क्लीबे चाद्विरहः स्वसोः। समासे सोरलुक्केति सिद्धं बाहुलकात्त्रयं
॥१॥ अन्योन्यामित्यादौ दलद्वये टाप्। अदुत्तरपद्रच्च। प्राप्तः। अन्योन्यसे सक्रम हास्त्रियामे। अ
न्योन्याश्रयतः परस्पराक्षि सादृश्यं। अदृष्टपरस्परैरित्यादौ सोर्लुक्कृच्। प्राप्तः। सर्वबाहुलकात् समा
धेयं॥ ॥इति द्विरुक्तिप्रक्रिया॥ ॥स्त्रियां। अधिकारोयं समर्थानामिति यावत्॥ अ
जाद्यतष्टाप्। अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्। अजा। अजादिभिः
स्त्रीत्वस्य विशेषणान्नेह। पंचाजी। अत्र समासार्थसमाहारनिष्ठं स्त्रीत्वं। अतः खट्वा। अजा। ए
डका। अश्वा। चटका। मूषिका। बाला। वत्सा। होडा। मंदा। विलाता। मेधा। सर्वा संभस्त्राजि
नशानपिंडेभ्यः फलात्। संफला इत्यादि। सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्। सत्पुष्पा। प्राक्पु
ष्पा। प्रत्यक्पुष्पा। शूद्रा चामहत्पूर्वा जातिः। पुंयोगे तु शूद्री। अमहत्पूर्वा किं। महाशूद्री। कुंचा। उ

मकौ॰उ॰
७०
70

ह्लिहा। देवविशा। ज्येष्ठाकनिष्ठामध्यमेति पुंयोगेपि। कोकिला। जाऽतावपि मूलान्नञः। अमूला।
उगितश्च। ङीप्। भवती। पचंती। वनो र च। वन्नंतात्तदंताच्च ङीप् रश्चांतादेशः। सुत्वानमतिक्रांता
अतिसुत्वरी। आधीतिवरी। शार्वरी। वनो न हशः। हशंताद्धातोर्विहितो। यो वन् तस्मान्न ङीप्रौ। ए
श्रयनयने। अवावा ब्राह्मणी। राजयुध्वा। बहुव्रीहौ वा। बहुधीवा। बहुधीवरी। पादोन्यतरस्यां॥
द्विपदी। द्विपात्। टाबृचि। द्विपदा ऋक्। एकपदा। मनः। मन्नंतान्न ङीप्। सीमा। सीमानौ। अनो बहु
व्रीहेः। अन्नंताद्बहुव्रीहेर्न ङीप्। बहुयज्वा। बहुयज्वानौ। डाबुभाभ्यामन्यतरस्यां। सूत्रद्वयोपात्ता
भ्यां डाब्वा। सीमा। सीमे। सीमानौ। दामानौ। दामे। अन उपधालोपिनोन्यतरस्यां। अन्नंता
द्बहुव्रीहेरुपधालोपिनो वा ङीप्। पक्षे डाप्निषेधौ। बहुराज्ञी। बहुराज्ञ्यौ। बहुराजे। बहुराजानौ
। प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः। स चाप् सुपः परो न चेत्। सर्विका। कारिका। अतः किं। नौका।
प्रत्ययस्थात्किं। शक्नोतीति शक्का। असुपः किं। बहुपरिव्राजका नगरी। मामकनरकयोरुपसंख्या
नं। मामिका। नरिका। त्यक्त्यपोश्च। दाक्षिणात्यिका। इहत्यिका। न यासयोः॥ ॥यत्तदे राम ७०

रस्येत्त्वं। यकासका। त्यक्नश्च निषेधः। उपत्यका। अधित्यका। आशिषि वुनश्च। जीवका। भवका।
उत्तरपदलोपेन। देवदत्तिका। देविका। क्षिपकादीनां च। क्षिपका। ध्रुवका। चटका। कन्यका। तारका
ज्योतिषि। वर्णका तान्तवे। वर्तका शकुनौ प्राचां। अष्टका पितृदेवत्ये। सूतका पुत्रिका वृन्दारका। एषां वेति
वक्तव्यं। एषां वा अकारो भवतीत्यर्थः। सूतका सूतिकेत्यादि। उदीचामातः स्थाने यकपूर्वायाः। यक
पूर्वस्य स्त्रीप्रत्ययस्यातः स्थाने योऽकारस्तस्य कात्पूर्वस्येद्वा आपि परे। केऽण इति ह्रस्वः। आर्यका। आ
र्यिका। चटकका। चटकिका। आतः किं। सांकाश्ये भवा सांकाश्यिका। यकेति किं। अश्विका। स्त्रीप्रत्ययः
किं। शुभंयिका। अभाषितपुंस्काच्च। एतस्माद्विहितस्यातः स्थाने इद्वा। गंगका। गंगिका। आदाचार्या
णां। पूर्वविषये। गंगाका। अनुपसर्जनात्। अधिकारोऽयं यूनस्तिरित्यभिव्याप्य। टि — णञ्द्वयस
ज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः। अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं ततो ङीप्। कुरुच
री। उपसर्जनत्वान्नेह। बहुकुरुचरा। नदट्। नदी। देवट्। देवी। सौपर्णेयी। ऐन्द्री। औत्सी। ऊरुद्वयसी
। ऊरुदघ्नी। ऊरुमात्री। पंचतयी। आक्षिकी। लावणिकी। यादृशी। इत्वरी। नित्यस्त्रयी। कुमुंस्तरुण

मक्को॰ उ॰ ७१

तलुनानामुपसंख्यानं। स्त्रैणी पौंस्नी शाक्तीकी। आढ्यंकरणी। तरुणी। तलुनी। यञश्च। अकारलो
पे कृते। हलस्तद्धितस्य। हलउत्तरस्योपधाभूततद्धितयस्य लोप ईति। गार्गी। प्राचां ष्फ तद्धितः। य
ञंतात् ष्फो वा। गार्ग्यायणी। वयसि प्रथमे। प्रथमवयोवाचिनो दंतात् ङीप्। कुमारी। वयस्यचरम
इति वाच्यं। वधूटी। चिरंटी। द्विगोः। अदंतात् ङीप्। त्रिलोकी। अजादित्वात् त्रिफला। त्र्यनीका। अपरिमा
णबिस्ताचितकंबल्येभ्यो न तद्धितलुकि। अपरिमाणांताद्बिस्ताद्यंतात्त्र द्विगोर्न ङीप् तद्धितलुकि। पंच
भिरश्वैः क्रीता पंचाश्वा। आर्हीयष्टक्। अध्यर्द्धेति लुक्। द्वौ बिस्तौ पचति द्विबिस्ता।। द्विकंबल्या। परि
माणात्तु द्व्याढकी। तद्धितलुकि किं। समाहारे पंचाश्वी। कांडांतात्क्षेत्रे। क्षेत्रे यः कांडांतो द्विगुस्तस्मा
न्ङीप् तद्धितलुकि। द्वे कांडे प्रमाणमस्याः द्विकांडा क्षेत्रभक्तिः। मात्रच्प्रमाणे लो द्विगोर्नित्यमिति
लुक्। क्षेत्रे किं। द्विकांडी रज्जुः। पुरुषात्प्रमाणेन्यतरस्यां। प्रमाणे यः पुरुषशब्दस्तदंताद्द्विगोर्ङीब्वा त
द्धितलुकि। द्वौ पुरुषौ प्रमाणमस्याः द्विपुरुषी द्विपुरुषा वा परिखा। ऊधसोऽनङ्। ऊधोंतस्य बहुव्रीहे
रनङ् स्त्रियां। बहुव्रीहेरूधसो ङीप्। ऊधोंताद्बहुव्रीहेः। कुंडोध्नी। स्त्रियां किं। कुंडोधो धेनुकं। दाम

राम ७१

हायनोताच्च। संख्यादेर्बहुव्रीहेर्दामांताद्धायनांताच्च ङीप्। द्विदाम्नी।। द्विहायनी बाला।। त्रिचतुर्भ्यां
विहायस्य णत्वं वाच्यं। वयोवाचकस्यैव हायनस्य त्रिहायणी।। चतुर्हायणी।। वयसोन्यत्र त्रिहाय
ना चतुर्हायना शाला।। अंतर्वत्पतिवतोर्नुक्।। नांतलान्ङीप्।। अंतर्वत्नी।। पतिवत्नी।। गर्भभर्तृसंयो
ग एवेष्यते।। अन्यत्र अंतरस्त्यस्यां शालायां। घटःपतिमती पृथिवी- पत्युर्नो यज्ञसंयोगे।। वसिष्ठ
स्य पत्नी।। विभाषा सपूर्वस्य। पतिशब्दांतस्य नो वा। गृहपत्नी।। गृहपतिः। दृढपतिः। नित्यं सपत्न्यादि
षु। सपत्नी एकपत्नी।। वीरपत्नी।। पूतक्रतोरैच।। पूतक्रतोः स्त्री पूतक्रतायी।। वृषाकप्यग्निकुसितकुसिद
नामुदात्तः। एषामुदात्त ऐ आदेशो ङीप् च। वृषाकपेः स्त्री वृषाकपायी।। अग्नायी।। कुसितायी।। कुसिदायी।।
मनोरौ वा। उ ऐ तो कारश्च वा ताभ्यां संनियोगशिष्टो ङीप् च। मनायी मनावी।। मनुः। वर्णादनुदात्तात्तोप
धात्तो नः। वर्णवाची यस्तोपधस्तदंतात् ङीप् तकारस्य च नः। एता। एनी।। रोहिता। रोहिणी।। षिद्गौरा
दिभ्यश्च। ङीष् स्यात्। नर्तकी।। गौरी।। अनडुही। अनड्वाही।। पिप्पल्यादयश्च। आकृतिगणोयं। मत्स्यस्य
ङ्या। यलोपः। मत्सी।। जानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्राव

म.कौ.उ.
७२
72

पनाकृत्रिमाश्राणस्थौल्यवर्णनाच्छादनमाऽयोविकारमैथुनेच्छाकेशवेषु। एकादेशेषु। एकाद
शभ्यः क्रमाद्वृत्त्यादिष्वर्थेषु ङीप्। जानपदी। वृत्तिश्चेत्। अन्या जानपदी। अत्र अंतत्वान्ङीष्प्रा
घुदात्तः। शोणात्प्राचां। शोणी। शोणा। वोतो गुणवचनात्। उदन्तात् गुणवाचिनो वा ङीष्। मृद्वी। उ
तः किं। शुचिः। गुणेति किं। आखुः। खरुसंयोगोपधान्न। खरुः। पाण्डुः। बह्वादिभ्यश्च। वा ङीष्। बह्वी।
बहुः। कृदिकारादक्तिनः। रात्रिः। रात्री। सर्वतोऽक्तिन्नर्थादित्येके। शकटिः शकटी। पुंयोगादाख्यायां।
या पुमाख्या पुंयोगात्स्त्रियां वर्तते ततो ङीष्। गोपस्य स्त्री गोपी। पालकान्तान्न। गोपालिका। अश्वपा
लिका। सूर्याद्देवतायां चाप्। सूर्यस्य स्त्री देवता सूर्या। इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवय
वनमातुलाचार्याणामानुक्। ङीष् च। इन्द्राणी। हिमारण्ययोर्महत्त्वे। महद्धिमं हिमानी। अर
ण्यानी। यवाद्दोषे। दुष्टो यवो यवानी। यवनाल्लिप्यां। यवनानां लिपिर्यवनानी। मातुलोपाध्याय
योरानुग्वा। मातुलानी मातुली। उपाध्यायानी उपाध्यायी। आचार्याद् णत्वं च। आचार्यानी। अर्य
क्षत्रियाभ्यां वा स्वार्थे। अर्याणी। अर्या। क्षत्रियाणी। क्षत्रिया। पुंयोगे तु अर्यी। क्षत्रियी। क्रीता

राम
७२

त्करणपूर्वात्। क्रीतात्। तादंतात्करणादेर्ङीष्। वस्त्रक्रीती। क्वचिन्न। धनक्रीता। बहुव्रीहेश्चान्तो
दात्तात्। क्तान्तान्ङीष्। ऊरुभिन्नी। अस्वाङ्गपूर्वपदाद्वा। पूर्वेण नित्ये प्राप्ते विकल्पोयं। सुरापीती।
सुरापीता। स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्। असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्ताद्वा ङी
ष्। अतिकेशी। अतिकेशा। चंद्रमुखी। चंद्रमुखा। संयोगोपधात्तु सुगुल्फा। अद्रवं मूर्तिमत्स्वाङ्गं प्रा
णिस्थमविकारजं। अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथायुतं।।। सुस्वेदा। द्रवत्वात्। सुज्ञाना। अमूर्त
त्वात्। सुमुखा शाला। अप्राणिस्थत्वात्। सुशोफा। विकारजत्वात्। सुकेशी सुकेशा रथ्या। अप्राणि
स्थस्यापि प्राणिनि दृष्टत्वात्। सुस्तनी सुस्तना वा प्रतिमा। प्राणिवत्प्राणिसदृशे स्थितत्वात्। नासि
कोदरौष्ठजंघादंतकर्णशृंगाच्च। वा ङीष्। तुंगनासिकी। तुंगनासिका। पुच्छाच्च। सुपुच्छी। सुपुच्छा।
कबरमणिविषशरेभ्यो नित्यं। कबरपुच्छी। उपमानात्पक्षाच्च पुच्छाच्च। उलूकपक्षी शाला। उलूक
पुच्छी सेना। न क्रोडादिबह्वचः। क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष्। कल्याणक्रोडा। आकृतिगणोयं।
सुजघना। सहनञ्विद्यमानपूर्वाच्च। न ङीष्। सकेशा। अकेशा। विद्यमाननासिका। नखमुखात्सं

म॰कौ॰उ॰ ७३ 73

ज्ञायां न ङीष्। शूर्पणखा। गौरमुखा। संज्ञायां किं। ताम्रनखी कन्या। वाहः। वाहंतात् ङीष्। दित्यौ
ही। सख्यशिश्वीति भाषायां। सखी। अशिश्वी। जातेरस्त्रीविषयादयोपधात्। जातिवाचि यन्न च
स्त्रियां नियतमयोपधं ततो ङीष्। आकृतिग्रहणा जातिर्लिंगानां च न सर्वभाक्। सकृदाख्यातनि
र्ग्राह्या गोत्रं च चरणैः सह। तटी। वृषली। औपगवी। कठी। जातेः किं। मुंडा। अस्त्रीविषयात्किं। ब
लाका। अयोपधात्किं। क्षत्रिया। योपधप्रतिषेधे गवयहयमुकयमनुष्यमत्स्यानामप्रतिषेधः
गवयी। हयी। मुकयी। मनुषी। मत्सी। ऊङुतः। पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च। पाकाद्यु
त्तरपदाज्जातिवाचिनस्त्रीविषयादपि ङीष्। ओदनपाकी। शंकुकर्णी। शालपर्णी। शंखपुष्पी। दा
सीफली। दर्भमूली। गोवाली। ओषधिविशेषरूढाः। इतो मनुष्यजातेः। ङीष्। दाक्षी। ऊङुतः। उकारां
तादयोपधान्मनुष्यजातिवाचिनः ऊङ्। कुरूः। पंगोश्च। पंगूः। श्वशुरस्योकाराकारलोपश्च। चा
दूङ्। पुंयोगलक्षणङीषापवादः। श्वश्रूः। ऊरूत्तरपदादौपम्ये। उपमानवाचि पूर्वपदमूरूत्तरप
दं यत्तस्मादूङ्। करभोरूः। संहितशफलक्षणवामादेश्च। संहितोरूः। सहितसहाभ्यां च। सहि

राम ७३

तोरूः। सहोरूः। शार्ङ्गरवाद्यञो ङीन्। शार्ङ्गरवादेरञो ऽकारस्य यदंतस्य च जातिवाचिनो ङीन्। शार्ङ्ग
रवी। वैदी। नृनरयोर्वृद्धिश्च। नारी। यङश्चाप्। आम्बष्ठ्या। कारीषगंध्या। षाद्यञश्चाप् वाच्यः। पौति
माष्या। आवट्याच्च। अस्मादाचाप् यञश्चेति ङीपोऽपवादः। आवटशब्दो गर्गादिः। आवट्या। यूनस्तिः। युव
न्शब्दात्तिः। युवतिः। अनुपसर्जनादित्येव। बहवो युवानोऽस्यां बहुयुवा। युवतीति तु यौतेः शत्रन्ता
न्ङीपि बोध्यं॥ ॥इति स्त्रीप्रत्ययाः॥ ॥षष्ठीयुक्तः छंदसि वा। पतिशब्दो घिसंज्ञः। क्षे
त्रस्य पतिना वयं। इह वेति योगविभागः छंदसीत्यनुवर्तते। तेन सर्वे विधयः छंदसि वैकल्पिकाः। बहु
लं छंदसीत्यादिरस्यैव प्रपंचः। अयस्मयादीनि छंदसि। साधूनि। भपदसंज्ञाधिकारात् यथायोग
संज्ञाद्वयं बोध्यं। तथा च वार्तिकं। उभयसंज्ञान्यपीति वक्तव्यमिति। स सुष्टुभा स ऋक्वता गणेन। पदत्वा
त्कुत्वं भत्वाज्जश्त्वाभावः। नैनेहि नित्यं पि वा जनेषु। अत्र पदत्वाज्जश्त्वं भत्वात्कुत्वाभावः। ते प्राग्धातोः। छं
दसि परेऽपि। व्यवहिताश्च। हरिभ्यां याह्योक आ। आ मंद्रैरिन्द्र हरिभिर्याहि। तृतीया च होश्छं
दसि। जुहोतेः कर्मणि तृतीया स्याद्वितीयार्थे। यवाग्वाग्निहोत्रं जुहोति। मंत्रे श्वेतवहोक्थशस्पुरो

म॰कौ॰उ॰
७८
74

अर्शोभिर्वन्नू । श्वेतवहादीनां डस्पदस्येति वक्तव्यं । यत्रपदत्वंभावितत्रैवेनापवादोडस्वक्तव्य
इत्यर्थः । श्वेतवाः श्वेतवाहौ । श्वेतवाहः उक्थानि उक्थैर्वा शंसति उक्थशाः यजमानः उक्थशा
सौ । पुरोदाश्यते दीयते पुरोडाः । अव यजः अवयाः अवयाजौ । अवयाः श्वेतवाः पुरोडाश्च । एत
संबुद्धौ निपात्यन्ते । लिङर्थे लेट् । सिब्बहुलं लेटि । इतश्च लोपः परस्मैपदेषु । लेटसिडंवालेटोऽडाटौ ॥
सौ वा तौ पितौ । सिब्बहुलं णिद्वक्तव्यः । वृद्धिः । प्रणआयूंषि तारिषत् । सुपेशसस्करति जोषिषद्धि । आ
साविषद्दर्शसाना । यत्रिपहृलोपस्य वाभावोपतातिदिद्युत् । प्रियः सूर्ये प्रियो अग्ना भवाति । स उत्तम
स्या । लेट उत्तमस्य सस्य वा लोपः । करवाव । करवावः । टेरेत्वं । आत ऐ । लेट आकारस्य । सुतेभिः सु
प्रयसा मादयैते । आतामित्याकारस्य ऐ । वैतोऽन्यत्र । लेट एकारस्य ऐ स्याद्वा आत ऐ इत्यस्य विषयं
विना पशूनामीशै । ग्रहा गृह्यातै । अन्यत्र किं । सुप्रयसा मादयैते । उपसंवादाशंकयोश्च । पणबंधे आ
शंकायां च लेट् । अहमेव पशूनामीशै । नेज्जिह्मायन्तो नरकं पताम । व्यत्ययो बहुलं । विकरणानां छं
दसि । ओड श्रुष्टुकस्य भेदति । भिनत्तीति प्राप्ते । जर — मरते पतीतिः । म्रियत इति प्राप्ते । इंद्रो वस्तेन नेषत ॥ राम ७८

नयने लोट्। आपुरसि पान्दौ विकरणौ। इन्द्रेण युजा तरुषेम वृत्रं। तरेमेत्यर्थः। तरतेर्विध्यादौ लिङ्॥
ऊः सिपूरापृच्चेति त्रयो विकरणाः। सुप्तिङुपग्रहलिंगनराणां कालहलच्स्वरकर्तृयङां च। व्यत्यय
मिच्छति शास्त्रकृदेषां सोपि च सिध्यति बाहुलकेन। धुरि दक्षिणायाः। दक्षिणस्यामिति प्राप्ते। चषा
लं ये अश्वयूपाय तक्षति। तक्षन्तीति प्राप्ते। उपग्रहः परस्मैपदात्मनेपदे। ब्रह्मचारिणमिच्छते। इच्छति॥
इच्छतीति प्राप्ते। प्रतीपमन्य ऊर्मिर्युध्यति। युध्यतः इति प्राप्ते। मधोस्तृप्ता इवासते। मधुन इति प्राप्ते॥
नरः पुरुषः। आधासवीरैर्दशभिर्वियूयाः। वियूयादिति प्राप्ते। कालः कालवाचकाः प्रत्ययाः। श्वोऽग्नी
नाधास्यमानेन। लुटो विषये लट्। तमसो गा अदुक्षत्। अधुक्षदिति प्राप्ते। मित्रं वयं च सूरयः स्यामि
त्रा वयमिति प्राप्ते। स्वरव्यत्ययस्तु वक्ष्यते। कर्तृशब्दः कारकमात्रपरः। तथा च तद्वाचिनां कृत्तद्धिता
नां व्यत्ययः। अन्नाद्याय। अणि विषये अच्। यङः कायशब्दादारभ्य लिङ्याशिष्यङ् इति ङकारेण प्रत्याहा
रः। तेषां व्यत्ययो भेदतीत्यादि रूपं एव। छन्दस्युभयथा। धात्वधिके प्रत्ययः सार्वधातुकार्धधातु
कोभयसंज्ञः। वर्धन्तु त्वा सुष्टुतयः। वर्धयन्त्वित्यर्थः। आर्धधातुकत्वाण्णिलोपः। विशृण्विरे सार्वधातुकत्वात्॥

म॰को॰उ॰ ७५
75

स्नुः स्नुभावश्च। कृत्स्नुर्वा रिति यत्। तुमर्थे से सेन् असे असेन् क्से कसेन् अध्यै कध्यैन् शध्यै शध्यैन्
तवै तवेङ् त्वेनः। से। वक्षे रायः। सेन्। ता वामेषा। असे। शरदो जीवसे धाः। असेन्। असेनि तु आद्युदात्तः।
क्से। प्रेषे। कसेन्। गवामिव श्रियसे शृंगमुत्तमं। अध्यै। अध्यैन्। जठरं पृणध्यै। पदे आद्युदात्तौ। क
ध्यै कध्यैन्। आहुवध्यै। शध्यै। राधसः सह मादयध्यै। शध्यैन्। वायवे पिबध्यै। तवै। दानवाउ। त
वेङ्। सूतवे। तवेन्। कर्तवे। प्रैषे रोहिष्ये अव्यथिष्यै। एते निपात्यन्ते। प्रयातुं रोढुं अव्यथितुमित्य
र्थः। दृशे विख्ये च। निपात्येते। द्रष्टुं विख्यातुमित्यर्थः। कृत्यार्थे तवै केन् केन्य त्वनः। धातोरेते स्युः। तवै
। अन्वेतवै। केन्। अवगाहे। केन्यः। दिदृक्षेण्यः। त्वन्। कर्त्वं। स्थपितद्दोः कसुन्। तुमर्थे। पुरा क्रूर
स्य विसृपो विरप्शिन्। पुरा जत्रुभ्य आतृदः। प्रकृत्यान्तः पादमव्यपरे। ऋक्पादमध्यस्थ एङ् प्रकृत्या
स्यादति न तु वकारयकारपरे अति। उपप्रयन्तो अध्वरं। सुजाते अश्वसूनृते। अन्तः पादे किं। एतास
एतो र्चति। अव्यपरे किं। ते वदन्। अव्याद्व्ययाद् वक्रमुरुव्रतायमर्वत्वस्युषु च। एषु व्यपरेष्वपि एङ्
प्रकृत्या। वसुभिर्नो अव्यात्। मित्रमहो अवद्यात्। माशिवासो अवक्रमुः। ते नो अवन्तु। शतधारो राम ७५

अयं मणिः। तेनो। अर्वेतु वृष्णिका। सो अवस्य वः। सुपां सुलुक्पूर्वसवर्णाछेयाडाड्यायाजालः। ऋज
वः संतु पथा। पंथान इति प्राप्ते। परमे व्योमन्। व्योमनि इति प्राप्ते। धीती। मती। सुष्टुती। धीत्या। मत्या।
सुष्टुत्येति प्राप्ते पूर्वसवर्णः। या सुरथा रथीतमा। यौ सुरथा वित्यादौ प्राप्ते आ। नताद्ब्राह्मणं नताम् इति
प्राप्ते आत्। या देव विप्रताता। न युष्मे वाजबंधवः। अस्मे इंद्राबृहस्पती। युष्मासु अस्मभ्यमिति प्राप्ते
उरुया धृष्णुया। उरुणा धृष्णुना इति प्राप्ते या। नाभा पृथिव्याः। नाभाविति प्राप्ते डा। ता अनुष्ठ्योच्यावय
तात्। आ डेर्ड्या। साधुया। साध्विति प्राप्ते याच। वसंता यजेत। वसंता यजेत। वसंते इति प्राप्ते आल्।
इयाडियाजीकाराणामुपसंख्यानं। उर्विया। उरुणेति प्राप्ते इ। या। सुक्षेत्रिया। सुक्षेत्रिणेति प्राप्ते
डियाच्। दृतिं न शुष्कं सरसी शयानं। सरस्यामिति प्राप्ते ई। आजसेरसुक्। ब्राह्मणासः। तन्वादीनां
वेयङुवङौ। तनुं पुषेम। तन्वं पुषेम। विषुं पश्य। विष्वं पश्य। स्वर्गो लोकः। सुवर्गो लोकः। त्र्यंबकं। त्रियंब
कं। वरेण्यं। वरेणियं। अतो भिस ऐस्। बहुलं छंदसि। अग्निर्देवेभिः। मंत्रेष्वाङ्यादेरात्मनः। आत्मन्
शब्दस्यादेर्लोप आङि। त्मना देवेषु। अपो भि मास छंदसीति वक्तव्यं। माद्भिः शरद्भिः। प्रसमुपोदः पादपू

म.कौ.उ.
७६
76

रणे। एषोद्देसाः। प्रप्रायमग्निः। संसमिद्युवसे। उपोपमेपरामृश। किन्नोदुदुहर्षसे। षष्ठ्याः पतिपुत्र
पृष्ठपारपदपयस्पोषेषु। विसर्गस्य सः। वाचस्पतिं विश्वकर्माणं। दिवस्पुत्राय सूर्याय। दिवस्पृष्ठं भं
दमानः। तमसस्पारमस्य। परिवीत इलस्पदे। दिवस्पयो दिधिषाणा। येरास्पोषं यजमानेषु धत्ते॥ ॥
इति वैदिकप्रक्रिया॥ ॥धातोः। अन्तउदात्तः। अनुदात्तं पदमेकवर्जं। परिभाषेयं स्वरविधिविषया।
यस्मिन्पदे यस्योदात्तः स्वरितो वा विधीयते तमेक- पंचं वर्जयित्वा शेषं तत्पदमनुदात्तान्वूकं स्यात्।
गोपायतो नः। अत्र सनाद्यन्ता धातव इति धातु- धातुस्वरेणायकाराकार उदात्तः। शिष्टमनुदात्तं॥
उदात्तादनुदात्तस्य स्वरितः। इतितकाराकारः स्वरितः। स्वरितात्संहितायामनुदात्तानां। एकश्रुतिः। इति
नकारातकारप्रचयः। अनुदात्तस्य च यत्रोदात्तलोपः। यस्मिन्ननुदात्त उदात्तो लुप्यते तस्योदात्तः। देवी
वाचं। अत्र ङीबुदात्तः। आद्युदात्तश्च। प्रत्ययश्चाद्युदात्तः कर्तव्यं। अनुदात्तौ सुप्पितौ। पूर्वस्यापवादः। य
स्मिन्नयो युच्छति। शप्तिपोरनुदात्ते स्वरितप्रचयौ। चितः। अन्तउदात्तः। चितः सप्रकृतेर्बह्वकजर्थं॥
चितिप्रत्यये सति प्रकृतिप्रत्ययस्यान्तोदात्तता वाच्येत्यर्थः। नमन्तामन्यके समे। यके सरस्वतीमन्वक

राम
७६

स्रुते। तद्धितस्य। चितस्तद्धितस्यांतउदात्तः। पूर्वेण सिद्धे त्रिस्वरबाधनार्थं। कौंजायनाः। कितः। कित
स्तद्धितस्यांतउदात्तः। यदाग्नेयः। नाग्निस्वरितं। क्वनूनं। उपोत्तमं रिति। रित्प्रत्ययस्योपोत्तममुदात्तं। यदा
हवनीये। ञ्नित्यादिर्नित्यं। ञ्निदंतस्य निदंतस्य चादिरुदात्तः। यस्मिन्विश्वानि पौंस्या। पुंसः कर्माणि
ब्राह्मणादित्वात्ष्यञ्। सुतेदधिष्ठ तथ्यनः चायतेरसुनु। चोयेरन्ने ह्रस्वश्चेति कोचेदसुनौ नुडा
गमः। लिति। पूर्वमुदात्तं। चिकीर्षकः। अत्र ईकारस्योदात्तता। इत्यादिप्रयोगमनुसृत्यान्वाख्या
तव्यं॥ ॥इति स्वरप्रक्रिया॥ ॥एवं वरदराजेन बालानामुपकारिकां। अकारि पाणिनी
यानां मध्यसिद्धांतकौमुदी॥१॥ कृतिर्वरदराजस्य मध्यसिद्धांतकौमुदी॥ तस्याः संख्या कृविशे
या खबाणकरवन्हिभिः॥२॥ इति श्रीचविरिकेटिकेरिवरदराजभट्टकृतमध्यसिद्धांतकौमुदी
समाप्ता॥ ॥श्री संवत्॥१८२५॥ श्रीशाके॥१६९०॥ माघशुद्ध १ भौमे श्रीकाश्यपांग्येकटेशेन लिखितं
शुभमस्तु॥ ॥श्रीराम॥ ॥श्रीराम॥ ॥श्रीराम॥ ॥श्रीरामचंद्र

